परिभाषेन्दुशेखरः

१४१५

४६ पत्राणि

नं. १५४५८

[illegible]

[illegible]

[illegible]

भेजी

नाम श्रीमद्

[illegible] १८ ८५०

ॐश्रीगणेशायनमः नत्वासाम्बशिवंब्रह्मनागेशःकुरुतेसुधीः बालानांसुखबोधायपरिभाषेन्दु
शेखरम् १ प्राचीनवैयाकरणतन्त्रेवाचनिकान्यत्रपाणिनीयतन्त्रेज्ञापकन्यायसिद्धानिभाष्यवा।
र्तिकयोरुपनिबद्धानियानिपरिभाषारूपाणितानिव्याख्यायन्ते ननुलणअइउणसूत्रयोर्णकार
प° स्यैवोपादानेनाणिणग्रहणेषुसन्देहादनिर्णयोतस्मादाह व्याख्यानतोविशेषप्रतिपत्तिर्नहिसन्देहा
१ दलक्षणम् विशेषस्यान्यतरार्थरूपस्यव्याख्यानतःशिष्टकृतात्प्रतिपत्तिर्निश्चयोहियतः संदेहाच्छा ना
स्त्रमलक्षणम् अननुष्ठापकंलक्षणंतथाच शास्त्रस्यनिर्णयजनकत्वौचित्यादित्यर्थः असंदिग्धानुष्ठा
नसिद्ध्यर्थंचशास्त्रेसंदिग्धोच्चारणरूपाचार्यव्यवहारेणसन्देहनिवृत्तयेव्याख्यानातिरिक्तनिमित्तानपेक्ष
अत्रसूत्रेपवैणाग्रहणं = त्वंबोध्यतेइतियावत् तेनाणुदित्सवर्णस्येत्यत्रपरिहायपूर्वेणाणग्रहणंपरेणाणग्रहणमितिलण् अतोऽग्रहा स्पेत्मारे
सूत्रेभाष्येस्पष्टम् १ तत्रसंज्ञापरिभाषाविषयेपक्षद्वयमित्याह यथोद्देशंसंज्ञापरिभाषंकार्यकालं
संज्ञापरिभाषमिति उद्देशमनतिक्रम्ययथोद्देशम् उद्देशउपदेशःदेशोऽधिकरणसाधनश्चायंयत्रदेशे
उपदिश्यतेतद्देशएववाक्यार्थबोधेनगृहीतशक्त्यागृहीतपरिभाषार्थेनचसर्वत्रशास्त्रेव्यवहारः देश।
श्चोच्चारणकालएवाचशास्त्रेव्यवह्रियते तत्तद्वाक्यार्थबोधेज्ञातेभविष्यतिकिञ्चिदनेनप्रयोजनमितिज्ञान १

स्थान ४ लो॰ उ॰ दृशप्तंतः ई॰दे॰ द्विवचनं

मात्रेण· संज्ञा च यथा। अत एवाह इमं तिपत्रं पे देशे यं पदार्थ इति हृत्सूत्रे कैयटः केचित्तु परिभाषाविषयेऽस्मिन्नि
त्यादिवाक्यार्थबोधे सप्तमीनिर्देशादिकेऽतिपर्यालोचनायां सकलतत्तद्विध्युपस्थितौ सकलतत्तत्संस्काराप
गुणाभेदं परिकल्प्यैकवाक्यतयैव नियमः कार्यकालपक्षे तु त्रिपाद्यामप्युपस्थितिरिति विशेषः एतदेवाभि
प्रेत्याधिकारो नाम त्रिःप्रकारः कश्चिदेकदेशस्थः सर्वशास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः स
र्वं वेश्माभिज्वलयतीति षष्ठीस्थाने इति सूत्रे भाष्ये उक्तम् अधिकारशब्देन पारार्थ्यात् परिभाषाप्युच्यते।
कश्चित्परिभाषारूप इति कैयटः दीपो यथा प्रभाद्वारा सर्वगृहप्रकाशकः एवमेतत्स्वबुद्धिजननद्वारा सर्व
भाष्य- शास्त्रोपकारकमिति तेनात्र यथोद्देशपक्षद्वयसाधारणं भाष्यम् एतद्द्वयेऽपि प्रदेशैकवाक्यतयार्थ इतः प्र विधिप्रदेश- भाष्यात्=
तीतेः तत्रैतावान्विशेषः यथोद्देशे परिभाषादेशे सर्वविधिसूत्रबुद्धावात्मभेदं परिकल्प्य तैरेकवाक्यता
परिभाषाणाम् तदुक्तं ङ्किति चेति सूत्रे कैयटे यथोद्देशप्रधानान्यात्मसंस्कारायसन्निधीयमानानि गुणा विधिसूत्राणि=
भेदं प्रपन्नानीति कार्यकाले तु तत्तद्विधिप्रदेशे परिभाषाबुद्ध्यैकवाक्यतेति अत्रैकदेशस्थ इत्यनेन तत्र विशेषः-
तत्र तद्बुद्धावपि तद्देशस्थत्वं बोधयति यथा व्यवहर्तॄणां कार्यार्थमनेकदेशगमनेऽपि तत्तद्देशीयत्वव्यव
हारः किन्त्वभिजनदेशीयत्वव्यवहार एव तद्वद्विधिवाक्यानामपि निषेधविशेषाकांक्षत्वाद्विध्येकवाक्य

कार्यकालपक्षे विधिप्रदेशेषु परिभाषाबुद्धौ परिभाषाया विधिप्रदेशस्थत्वं=

साहचर्यंचनिर्दिष्टशास्त्रकाङ्क्षापात्तद
कवाक्यतामात्रेण:

तथैवानुवृत्तिपरिभाषासाहचर्यात्परिभाषात्वेनव्यवहारः क्ङितिचेत्यत्रभाष्ये तत्रैकवाक्यतापर्युदासन्या
येनप्रसज्यप्रतिषेधेपितेनसहवाक्यार्थबोधमात्रेणैकवाक्यताव्यवहारः संज्ञाशास्त्रस्यतुकार्यकालप
प॰ क्षेतच्छास्त्रवाक्यार्थबोधः किंत्वप्रदेशवाक्येनसहैव अतएवाणोऽप्रगृह्यस्येत्यत्रनैकवाक्यतापक्षाददसो
२ मादित्येतत्प्रतिनप्रगृह्यसिद्धेऽप्रसिद्धत्वस्यकार्यार्थंतया कार्यज्ञानोत्तरमेवप्रवृत्तिः कार्यज्ञानंचप्रदेश
देशएवेतिनदेशस्यस्यासिद्धत्वात्सर्वग्रहणेनाग्रहणात् एवंतद्दोषोत्तरमेवविरोधप्रतिसन्धानञ्चेति
तत्रत्यपरत्वमेवविप्रतिषेधसूत्रप्रवृत्तौबीजम् अतएवकार्यकालपक्षेऽप्यादिभ्यः परेवप्रगृह्यसंज्ञेत्यदसो
मादितिसूत्रेभाष्येउक्तम् आकडाराधिकारस्यभपदसंज्ञादिविषयेतयोरुद्देशपक्षएवेतितत्रत्यपरत्वे
नैवबाध्यबाधकभावः पदादिपदानान्तत्रजातशक्तिग्रहेणैवविधानामपिव्यवहारः अतएवपूर्वत्रासि
द्धमितिसूत्रेपरिभाषाणामेवविधानामप्रवृत्तिमाशंक्यकार्यकालपक्षाश्रयेणसमाहितमित्याहुः स्पष्टंचेदंक्ङि
तिचेत्यत्रकैयटे यथोद्देशपक्षः प्रगृह्यसंज्ञाप्रकरणेभाष्ये कार्यकालमित्यस्यचकार्येणकाल्यते सूत्रत्रिपि
प्राप्यतइत्यर्थः कार्येणास्वसंस्कारायस्वहृत्तिलिङ्गःचिह्नितपरिभाषाणामात्तेपइतियावत् अतएवपूर्वत्रा २
सिद्धमितिसूत्रभाष्येविधानामसिद्धत्वात् तत्रसपादसप्ताध्यायिस्थपरिभाषाणामप्रवृत्तिमाशंक्य यथ

पीदंतत्रासिद्धं तन्निर्हस्थिद्धमित्युक्तातावतापिसिद्धिरित्यभिप्रायकेकथमितिप्रश्ने कार्यकालं सञ्ज्ञापरिभा
षम् यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमित्युक्तं नच कार्यकालपक्षे ऽ॰मोऽनुस्वारादित्यादौ नस्यादित्युत्तरे सिन्निति स्फ ०१
निर्दिष्ट इति परिभाषाद्वयोपस्थितौ परत्वादुभयनिर्देशे पञ्चमीनिर्देशो बलीयान्॰ इति तस्मिन्निति सूत्रस्य
भाष्यासङ्गतिः उभयोरेकदेशस्थत्वेन परत्वादित्यस्यासङ्गतेः॰ स्थ इंचेदमिको गुणवृद्धी इत्यत्रैकैपदेश इति वाच्यम्॥ पाव्हुतत्पदस्तं-
विप्रतिषेधे परं सूत्रे शाध्यायीपाठक्रमाश्रयणस्यानुपयोगोमादोषात् नहिकार्यकालपक्षेप्युक्तावतातद्देशेतिपदस्य
येपि प्रदेशेषु स्वबुद्धिजननेनाविशेषात् नहितत्पदेष्वचेतनस्य शास्त्रस्य स्वदेशे विद्यायतद्देशगमनं सम्भवा
ति नाप्यस्मदादिबुद्धिजननेन स्वदेशत्यागो भवति अतएव भाष्ये एकदेशस्थस्येव सर्वशास्त्राभिज्वालकत्वम्
क्तम् अतएव तस्मिन्निति सूत्रे एकैपदः सूत्रपाठापेक्षया परत्वस्य व्यवस्थापकत्वमिति इको गुणेति सूत्रस्यैकै
पदस्थ चिन्त्यएव अन्यथा सर्वशास्त्राणां प्रयोगार्घत्वेन प्रयोगरूपैकदेशस्थत्वेन कापि परत्वं नस्यात् किञ्च
क्ङितिचेति सूत्रस्यैकैपदरीत्या विधिसूत्राणां यथोद्देशपक्षे परिभाषादेशेसन्निधानेन तेषां परत्वं व्याहन्येत॥
एवं च हन्तेः पूर्वत्रेत्यत्र सपिबेत्यतः परत्वाद्धकुवचनेकलीनेत्वमित्याशुद्धिघेतेस्पलम् २ इत्संज्ञाकार्यमन्तरवन्या
त्येष्ववयवानवयवत्वसन्देह आह ॥ अनेकान्ता अनुबन्धा इति ॥ अनेकान्ता अनवयवा इत्यर्थः योह्यवयवः

कार्यकालपक्षे
ऽ॰मोऽनुस्वारे स्यौ
कदेशस्थत्वेन =
विधिप्रदेशेषु

सकदाचित्तत्रोपलभ्यते एवायं न न तया तद्दर्शभूते विषये कदाप्यदर्शनात् शितकिदित्यादौ समीपे वयव
त्वारोपेण समासो वाच्यः तुन्नवुणक ठेत्यादौ णित्वप्रयुक्तं कार्यं पूर्वस्यैवेत्यादि व्याख्यानतो निर्णेयम् ३
प॰ लेममित्यत्रायशब्दः परसमीपवाचकः ४ वस्तुतस्त्वेकान्तत्वात्तेनैवन्यायेनांशत्वेन तत्रोपलम्भादयत्रानुपल
३ भाच्च अनवयवो हि काकादिरेकजातीयसम्बन्धेन न तद्वद्दृष्टतादिषूपलभ्यते नैवमयम् एवं हि वरूत्री हिरण्यपिण्डा
3 यतः ऽपपन्नः अन्यशब्देन लक्षणात्वन किंचानवयवत्वेन शकप्रत्ययादौ कादेरित्वानापत्तिः प्रत्ययादित्वाभा २
वात् दव्रचस्थकारस्य चर्यत्वापत्तेश्चेदं च तस्य लोपस्य प्रभाष्ये स्पष्टम् तत्र सूक्ष्ममेकान्तानुवन्धात्वेनास्या
यमितिदिक् ५ नन्वेकान्तत्वेऽनेकालत्वादेवौशादीनां सर्वादेशत्वसिद्धावनेकालसूत्रे शिड्ग्रहणं व्यर्थमत
आह ॥ नानुबन्धकृतमनेकाल्त्वम् ॥ शिड्ग्रहणमेतज्ज्ञापकं तेनार्वणस्तृ इत्यादेर्नं सर्वादेशत्वम् डा लुटः प्रथमस्य डारौरसः
दिविषये तत्सर्वादेशत्वं विनातद्वंशस्यैवाभावेनानुपपत्त्या सिद्धम् ६ नन्वेवमपि ग्रवदातेमत्वमित्यत्र पलो।
पोत्तरमात्वे कृते दाविति घुसंज्ञाप्रतिषेधो न स्यात् द्युपः पकारसत्वे नैजन्तत्वाभावादात्वाप्राप्तौ पलोपोत्तरं
पकाराभावेनास्य दाप्याभावादित्यत आह ॥ नानुबन्धकृतमनेजन्तत्वम् ॥ उदीचाम्माङ्ङ्गितिनिर्देशोऽ १
स्य ज्ञापकः आदेच इति सूत्रेण उपदिश्यमानस्यैजन्तस्यात्वं क्रियते ङकारसत्त्वे एजन्तत्वाभावादात्वाप्राप्तेल।

अमनूपः अन्यथान्तर्गस्यौबाधकः स्वरूपस्तु नित्यं बाधकः ॥

स्यासङ्गतिः नचास्यामवस्थायां तस्य धात्वन्तराभावात् कथमात्वं तत्र यथातो दिस्य स्यानिष्ठते रित्वमत्र विस्तारः स्य
इदं चेदं दाधाघ्विति सूत्रे भाष्ये ७ नन्वेवमपि दांस्वरूपस्यैवेत्येकविषये णोप्यायति रित्यत आह ॥ नानुबन्धकृ
तमसारूप्यम् ॥ ददातिदधात्योर्विभाषेति णावाधकशास्य विकल्पविधायकमस्याः ज्ञापकम् तेन गोदश्चादो स्यातोनुपसर्गे कः
कर्मव्यत्ययः नाणिति वासरूपसूत्रे भाष्ये स्पष्टम् ८ ननु संख्याग्रहणे बह्वादीनामेव ग्रहणं स्यात् प्रकरणस्याभिधानियाम
कत्वसिद्धान्त् कृत्रिमाकृत्रिमयोः कृत्रिमे एव कार्यसंप्रत्यय इति मायात् अस्ति च प्रकृते बह्वादीनां संख्यासञ्ज्ञा
कृतेति ज्ञानरूपं प्रकरणं न तु लोकप्रसिद्धैकद्व्यादीनामित्यत आह ॥ उभयगतिरिह भवति ॥ इह शास्त्रे सं
ख्याया अति शदन्तायाः इति निषेधो ज्ञापकः नहि कृत्रिमा संख्या त्यन्ता शदन्ता वास्ति तेन कर्तरि कर्म
व्यतिहारे एक एव मे येभ्यः करोति विप्रतिषिद्धं चानधिकरणे त्यादौ लौकिकक्रियाद्याद्यवगतिः क्वाकृत्रिमस्ये
वकृत्रिमस्यैवेत्यत्र लक्ष्यानुसारिव्याख्यानमेव शरणम् अत एवाम्रेडितशब्देन कृत्रिमस्यैव ग्रहणं न तु हि
स्त्रिरुक्तमात्रस्य स्य इदं चेदं संख्यासञ्ज्ञासूत्रे भाष्ये यत्तु संज्ञासूत्राणां मध्ये स्थित्वेनानेन शब्देनैते एव ग्राह्या इति निय
मार्थत्वं कृत्रिमाकृत्रिमन्यायवीजमिति तन्न तेषामगृहीतशक्तिग्राहकत्वेन विधित्वसम्भवति नियमत्वायो।
गात् सर्वे सर्वार्थवाचका इत्यभ्युपगमोपिपोतिदृस्यानन्तस्यदृष्टा विशिष्य सर्वशब्दार्थज्ञानस्याशक्यत्वात् सा

प० ४ मान्यज्ञानं तत्र नवीयोपयोगी त्यन्यत्र निरूपितम् ८ नन्वथेत्ताशयितेत्यादौ इट् शीङोऽङित्वाद्गुणनिषेधः स्यादत
आह ॥ कार्यमनुभवन्हि कार्यो निमित्ततया नाश्रीयते ॥ स्थण्डिलाच्छयितरीति निर्देशो ज्ञापकः कृति
न विषमीत्यादिसिद्धये कार्यमनुभवन्निति अत्र हि द्विर्वचने चीति नुशब्दस्य द्वित्वम् अन्यथा सन्यङोरित्यस्य षष्ठी।
त्वात्सनन्तस्य कार्यित्वे नैवेतोहित्वनिमित्तत्वाभावात्तत्प्रवृत्तिर्न स्यात् वस्तुतः समवायिकारणनिमित्तकारण।
योर्भेदस्य सकललोकतन्त्रप्रसिद्धतया तस्य तत्त्वेनाश्रयणाभावेन नैव ज्ञापकसाध्या अत एव द्विः प्रयुक्तः स
हिते नानाश्रयणो हेतोः प्रसिद्धत्वं येतत्यतीतित्वं द्विर्वचने चीत्यत्र भाष्ये ध्वनितम् ९ ननु प्रणिदापयतीत्यादौ।
दाङ्रूपस्य विधीयमानाद्युसंज्ञा दापे नैः स्यादत आह ॥ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ यमुद्दि
श्य आगमो विहितः स तद्गुणीभूतः शास्त्रेण तदवयवत्वेन बोधितोऽतस्तद्ग्रहणेन तद्ग्राहकेण तद्बोधकेन श।
ब्देन गृह्यते बोध्यत इत्यर्थः तत्र तद्गुणीभूता इत्यंशो बीजकथनम् लोकेऽपि देवदत्तस्याङ्गुल्यधिके तद्विशिष्ट
स्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते यमुद्दिश्य विहित इत्युक्तेः प्रणिदापयतीत्यादौ न दाप्रित्यस्य इत्वं आने मुगि
ति मुग्विधानसामर्थ्यादेवानित्या अन्यथा पचमान इत्यादौ अकारस्य मुक्वन्नयायविभावया विशिष्टस्य सव ४
र्णदीर्घे तद्वैयर्थ्यं स्पष्टमेव तेन दिदीये इत्यादौ यणादिः न जहारेत्यादावात औ णल इति न नैव कारादेर्वा।

एवर्णान्तरमवयवः कथमिति वाच्यम् वचनेनावयवत्वबोधनात्तस्य चावयवस्यात् दृश्ये पर्यवसानमेवाव्य
म् नचोक्तज्ञापकाद्वर्णग्रहणेः स्याः प्रवृत्तिरिति वाच्यम् आनेमुगिति सूत्रभाष्ये अकारस्यांगावयवस्यामुगि
त्यर्थपर्यवसानरूपत्वप्रतास्यन्तवदावेदिति स्थानेनस्यादित्याशंक्याद्युपदेशभक्तस्तद्ग्रहणेन ग्रहिष्यते इत्येकेवसङ्कःस्या
पत्तेः किञ्च उ· मन्त्रपदावयवस्य ह्रस्वात्परस्य उ· मोऽ· मुडित्यर्थे ऊर्वन्नात्तिरित्यादौ उ· मुडागमेणान्वप्राप्तिमाशं
क्य पदागमाः इति न्यायेनाघनस्यापि पदान्तग्रहणेन ग्रहणात् पदान्तस्येति निषेधः अनया च परिभाषया गमा
नामागमिधर्मवैशिष्ट्यमपि बोध्यत इत्याशयकउ· मुट्सूत्रस्य भाष्यासङ्गतेश्च किन्तु णादेरपरत्वे रेफवि
शिष्टे गुणाद्येष्टव्यम् अन्यथा ऋकारस्य गुणवृद्धी अरायवेवेति नियमो न स्यात् तच्च वर्णग्रहणे पतदग्रह
णेन सङ्गच्छते अत एव रदाभ्यामिति सूत्रे भाष्ये गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसञ्ज्ञकोऽभिर्व
र्त्तत इति अत एव नेदितो रनिटीत्यादि चरितार्थम् अनागमकानां सागमकास्त्रादेशा इत्यस्यास्त्वयमर्थः आदि
धान्तकस्य उ आगमः इत्यर्थे ज्ञाने नित्ये ष्वप्रवृत्ते ष्वागमविधानानुपपत्त्यार्थापत्तिमूलकवाक्यान्तरकल्पनेने दृष्टहित
भूयिप्रसङ्गेऽसे ऽट्वृद्धिः कर्त्तव्येति एवं चादेशेष्वित्रापि वृद्धिविपरिणाम इति न नित्यता हानिः स्थानिवत्सूत्रे च
नेटशादेशग्रहणं सातादप्राप्यापी बोधितस्यास्यादेशभावे चारितार्थ्यात् किं चैवं सति स्थानिवद्भावे वकार्यग्रहसा

निर्दिश्यमानपरिभाषायाअप्रवृत्त्या तु सहितस्यापि वा घादेशापत्त्या लावस्थायामडिति भाष्योक्तसिद्धान्तासङ्गतिः
स्थानिवद्भावविषये निर्दिश्यमानस्येति परिभाषाप्रवृत्तौ तिस्रणमित्यत्र परत्वात्तिस्रादेशे स्थानिवद्भावेन त्रया
प० देशमाशंक्य सत्कृतमिति न्यायेन समाधानपरभाष्यासङ्गतिः एकहित्यादौ स्थानषष्ठीनिर्देशात्तदन्तपरतया
५ पठितवाक्यस्यैव समुदायादेशपरत्वेनादेशग्रहणसामर्थ्यात् समस्यानिवत्सूत्रे ग्रहणेन न दोषः आनुमा
5 निकस्यान्यादेशभावकल्पनेपि श्रौतस्यान्यादेशभावस्य न त्यागः इत्यचः परस्मिन्नित्यादेर्नासङ्गतिः एतेन य
दागमास्तद्गुणीभूता इति परिभाषा स्थानिवत्सूत्रेण गतार्थेत्यपास्तं एतत्सर्वं दाधाध्विति सूत्रे भाष्ये स्पष्टम् ॥ नन्वेवमदस्मा
दित्यादावुदः स्थास्तम्भोरिति पूर्वसवर्णापत्तिरत आह ॥ निर्दिश्यमानस्यादेशा भवन्ति ॥ षष्ठी स्थानेयोगे
ति सूत्रमावर्तते तत्र द्वितीयस्यायमर्थः षष्ठ्यन्तं निर्दिश्यमानमुच्चार्यमाणमुच्चार्यमाणसजातीयमेव निर्दि
श्यमानावयवरूपमेव वा स्थानेन स्थाननिरूपितसम्बन्धेन युज्यते न तु प्रतीयमानमित्यर्थः तेनेदं सिद्धं न चा
स्यचाविव्यादौ दीर्घाणामादेशानापत्तिस्तेषां निर्दिश्यमानत्वाभावादिति वाच्यम् जातिपक्षे दोषाभावात् किं
च नभ्रस्तधियोरिति निषेधेन ग्रहणकशास्त्रस्यगृहीतानां निर्दिश्यमानकार्यबोधनान्न दोषः इयङुवङौ ङि ५
त्वं तु वर्णो वर्णान्तरधातुस्थ स्रुवामित्यर्थेन धात्वादीनामपि निर्दिष्टत्वादन्यादेशाभावाय ईङ्·दिङ्·ङि·त्वन्तु

स्पष्टार्थमेव एतेनेदं ङित्त्वं वा ग्रहणे निर्दिश्यमानपरिभाषाया अप्रवृत्तिज्ञापकमित्यपास्तम् इयव
रङ्सूत्रस्थेनायोगवाहानामुपदेशेऽल्लोन्त्यविधिः प्रयोजनं हलन्त्यसूत्रेनेतद्सिद्धिप्रयोजनं निर्दिश्यमानस्येत्ये
व सिद्धमिति भाष्येण विरोधात् अनयापरिभाषया येन विधिरिति सूत्रबोधिततदन्तस्यस्यानित्वाभा
वबोधनं यदागमा इति लक्ष्यस्य च तेन सुपदउदस्यादित्यादिसिद्धिः अनया च स्वस्वनिमित्तसन्नियापिता
नामलोन्त्यस्येत्यादीनां समावेश एव न बाध्यबाधकभावो विरोधाभावात् नाप्यङ्गाङ्गीभावः उभयोः प
रार्थत्वेन तदयोगात् अनेकाल्शिदिति सूत्रे च सर्वश्रेणैतत्परिभाषाबोधितमेव बाध्यते यत्नादेः परस्यालोन्त्य
स्येत्येतावेतद्बाधकाविति तत्र उदः स्थादिति सूत्रविषये स्थाऽस्यादेः परदिति सूत्रे भाष्ये सञ्चारितत्वात् नाप्ये
नयोर्विपंबाधिका एतयोर्निर्विषयत्वप्रसङ्गादिति [illegible] विंशतीति सूत्रे कैयटः अकज्ज्विषयेनायं न्यायः सूत्रा
निवद्भावे नैव तन्मध्यपतितन्यायेन तत्सुष्येव कार्यजननात् इयं चावयवषष्ठीविषयेपि अत एव तदोः सः सा
विति सूत्रमतिस्मरत्वोपगीतकारस्य न निर्दिश्यमानपुष्पदाद्यवयवमपर्यन्तस्यैव स्यूयादयो नत्वतिष्यमि
त्यादेः सोपसर्गावयवपर्यन्तस्येति बाध्यम् पादः पदिति सूत्रे षष्ठी स्थानेयोगेति सूत्रे च भाष्ये स्पष्टैव १२ ननु चैतस्या
दोह्रस्वस्येकारस्य प्रमाणत आन्तर्यादकारोपि स्यादत आह ॥ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं ब

लीयः ॥ अनेकविधंस्थानार्थगुणप्रमाणाकृतम् अत्रमानेनषष्ठीस्थानेइत्यतएकदेशानुवृत्त्यास्थानेग्रहणे
ऽनुवर्तमानेऽन्तःस्थानेन्तरतमइतिसूत्रेस्थानेग्रहणमेव तद्धितनीययाविपरिणम्यवाक्यभेदेनस्थानि।
प॰ नःप्रसङ्गेजायमानःसतिसंभवेस्थानतएवान्तरतमइत्यर्थकम् तमश्चग्रहणमेवानेकविधान्तर्यसमन्ता
६ गमकंस्थानेनेत्यर्थः तत्रस्थानतआन्तर्यामिकोयणचीत्यादौप्रसिद्धमेव अर्थतःपदत्रइत्यादौ स्वार्था
भिधानसमर्थस्यैवादेशतेतिसिद्धान्तात्द्वयदर्थाभिधानसमर्थोयः सतस्यादेशइतितत्समानार्थतत्स-
मानवर्णपादादीनान्ते तज्वत्काशुविति चगुणतोवाग्वविरित्यादौ प्रमाणतोऽदसोसेर्विरित्यादौ स्थानेन्त
रतमइतिसूत्रेभाष्येस्पष्टैषा ४९ ननुप्रोठवानित्यत्रप्राह्रहोढेतिवृद्धिःस्यादतआह ॥ अर्थवद्ग्रहणेनान
र्थकस्य ॥ विशिष्टरूपोपादानेउपस्थितार्थस्यविशेषणतयान्वयसम्भवेत्यागेमानाभावोऽस्यामूलम्
अत्रार्थःकल्पितान्वयव्यतिरेककल्पितःशास्त्रीयोपरदृश्यतेइतिसंख्यापाश्रतीतिसूत्रेभाष्यस्पष्टम् इयंच
वर्णग्रहणेऽनेनेतिलस्येत्यत्रभाष्येस्पष्टम् अतएवैषाविशिष्टरूपोपादानविषयेतिवृद्धाः एतन्मूलकमेवक्ये
नविधिरितिसूत्रेभाष्येपठ्यतेऽलेवानर्थकेनतदन्तविधिरिति किञ्चस्वंरूपमितिशास्त्रेस्वशब्देनात्मीय ६
वाचिनार्थाः दृश्यतेरूपशब्देनस्वंरूपम् एवंचतदुभयंशब्दस्यसंज्ञीतितदर्थः तत्रार्थानविप्रोष्यस्तत्रशा

स्त्रीयकार्यासम्भवात् किन्तु शब्दविशेषणं। एवं चार्थविशिष्टः शब्दः संज्ञीति फलितम् तेनैवापविभाषा
सिद्धेति भाष्ये स्पष्टम् १४ नन्वेवमपि मद्रहृतश्चन्द्रमाश्चेत्यत्रान्महत इत्यात्वापत्तिरत आह ॥ गौणमुख्ययोर्मु
ख्ये कार्यसंप्रत्ययः ॥ गुणादागतो गौणः यथा गोशब्दस्य जाड्यादिगुणनिमित्तोऽर्थो वाहीकः अप्रसिद्धस्सं
ज्ञादिरपि तद्गुणारोपादेव बुध्यते मुख्यमिव प्रधानत्वान्मुख्यः प्रथमश्रुत्यर्थः गौणोऽर्थे शब्दः प्रयुज्यमानो
मुख्यार्थारोपेण प्रवर्त्तते एवं चाप्रसिद्धत्वे गौणत्वाल्लाक्षणिकत्वं चात्र गौणत्वं तेन न प्रियत्र्याणामित्यादौ त्र्यादे
शो भवत्येव तत्र त्रिशब्दस्य तदविशेषणत्वेपि उक्तरूपगौणत्वाभावात् किञ्चायं न्यायो न प्रातिपदिककार्ये किं
तु उपात्तं विशिष्यार्थोपस्थापकं विशिष्टरूपं यत्तादृशपदकार्य एव परिनिष्ठितस्य पदान्तरसंबन्धे हि गौर्वा
हीक इत्यादौ गौणत्वप्रतीतिर्न तु प्रातिपदिकसंस्कारवेलायामित्यनन्तरंगत्वाज्जातसंस्कारत्वादयोगः प्राति
दिककार्यग्रहणस्याभावे बीजं श्वशुरसदृशस्यापत्यमित्यर्थके श्वाशुरिरित्यादावतइञः सिद्धये उपात्तमित्यादि ॥
न च प्रातिपदिकपदं तादृशमिति वाच्यम् तेन हि प्रातिपदिकपदवत्त्वेनोपस्थितिरिति तत्स्वविशिष्यार्थोपस्थाप
कत्वाभावात् निपातपदे तु चादित्वेनैव चादीनामुपस्थापकमिति तदुद्देश्यककार्यविधायके प्रादित्यादावेत
न्मद्गत्या गौः अभवन्नित्यादौ दोषाभावात् अग्नीषोमौ माणवकाविति तत्र प्रसिद्धदेवताद्वन्द्ववाच्याग्नीषोमपदस्य तन्मद्दशापत्तेः

नरङ्कुत्वादीत्वषत्वे भवत एव स्तुतशलाकाणिकाग्निसोमपदयोर्द्वन्द्वे तन्नामकावित्यर्थके च नेत्वषत्वे आद्ये
गौणलाक्षणिकत्वादन्यैः प्रसिद्धत्वात् अत एवाग्निसोमौ माणवकावित्यत्र गौणमुख्यन्यायेन षत्ववारण
प· परमग्नेः स्तुतस्तोमसोमाः इति सूत्रस्य भाष्यं सङ्गच्छते गां पादयेत्यादौ मुख्ये गोपदार्थस्य पादनकर्मत्वासं
८ भवेन विभक्त्युत्पत्तिवेलायां प्रयोक्तृभिर्गौणार्थप्रतीतावप्यपदस्याप्रयोगाणावोद्धृभिः सर्वत्रपदस्यैव गौणा
र्थकत्वग्रहणाऽत्वं संपद्यते अमहान्महान्सम्पन्नस्तद्भवनीत्यादिभाष्यप्रयोगे वा घादेशादीत्वादीनां करणेन।
चास्य पदकार्यविषयत्वमेवोचितम् अन्यथा वाक्यसंस्कारपक्षेते तदनापत्तिः किं च सुक्तामित्युक्ते कर्मनि
र्दिष्टं कर्त्ता क्रिया चाऽनिर्दिष्टेत्याद्युक्तेः इदानीं ग्राममजां नय सो देवदत्तेत्यादौ सर्वं निर्दिष्टं ग्राममेव कर्म देवदत्त ए
व कर्त्ता अजां नयेव क्रियेत्यर्थकेनाऽथवा सूत्रस्य भाष्येणाकारकादिमात्रप्रयोगे योगे सर्वक्रियाद्यध्याहारे प्रसक्ते।
नियमार्थः क्रियावाचकादिप्रयोग इत्येतत्तात्पर्यकेण सामान्यतः क्रियाजन्यफलाश्रयत्वमात्रविवक्षायां द्वितीया
दीनां साधुत्वान्वाख्यानमित्यर्थलाभेन पाठनक्रियान्वयकाले पदस्यैव गौणार्थत्वप्रतीतिः प्रयोक्तुरपि एवमेत
न्मूलकोऽभिव्यक्तपदार्था ये इति श्लोकोऽपि पदकार्यविषयकः ध्वनितं चेदं सर्वादि सूत्रे संज्ञाभूतानां प्रतिषेध
मारभमाणा वार्त्तिककृता सर्वपरेति सूत्रे संज्ञायामिति वदता सूत्रकृता ऽन्वर्थसंज्ञया तत्प्रत्याख्यानं कुर्वता भाष्य २

कृताच अर्थाश्रयेएतदेवंभवतिशब्दाश्रयेचह्रस्वात्वेरितिश्रान्तरस्यभाष्यस्यलौकिकार्थवत्वयोगपदाश्रये
चपचन्यायस्त्वद्दितशब्दाश्रयेचतेरित्यर्थः गीतइतियथाकृतमस्त्रेविशिष्टरूपोपादानसत्वेनोक्तरीत्यैवतस्य
भाष्यस्याख्येयत्वादित्यलम् ५५ अर्थवद्ग्रहणेइत्यस्यापवादमाह अनिनस्मन्ग्रहणान्यर्थवताचानर्थकेन
चतदन्तविधिंप्रयोजयन्ति येनविधिरित्यत्रभाष्यवचनत्रयेणापठितेषातेनराज्ञासामेत्यादौअल्लोपः दण्डी
वाग्मीत्यादाविञ्झलितिनियमः सुपयाः सुस्रोतानाइत्यादावत्वसन्तस्येतिदीर्घः सुशर्मासुप्रथिमाइत्यादौमन
इतिङीप्निषेधश्चसिद्धः अन्येत्वपठितेविधौधमित्यत्रतत्वमाहतयेक्रियमाणादिणः धीपमित्यत्राङ्गग्रहणा
दर्थवत्परिभाषाः नित्यातन्मूलकमिदमित्याहुः विभाषेटइत्यत्रअनर्थकधीधमः संभवादत्रापितस्यैवग्रहणा
मितिभ्रमवारणायाङ्गादित्युक्तमपरे ५६ ननुश्रेत्यत्रलिङ्क्षिचावात्मनेपदेष्वित्येवसम्बध्येतानन्तरत्वादतआ
ह ॥ एकयोगनिर्दिष्टानांसहवाप्रवृत्तिः सहवानिवृत्तिः ॥ वाशब्दश्चवार्थेपरस्परान्वितार्थकपदानांसहैवा
नुवृत्तिनिवृत्तीइत्यर्थः एककार्यनियुक्तानांबहूनांलोकेतथैवदर्शनादितिभावः यत्वत्रज्ञापकेनेड्दीत्येत
इदितिवर्त्तमानेआर्धधातुकस्येडित्यत्रवनतिग्रहणंतद्धिनेत्यस्याः संबन्धार्थमितितत्रदीधीवेवीटामितिसूत्रेभा
ष्यतत्रेत्युग्रहणप्रत्याख्यानायेग्ग्रहणेनवर्त्तमानेवनतिग्रहणमस्येटोग्रहणार्थंविकाराभावार्थत्वसोक्तत्वेनतद्विरो

प॰ ८

धात् नञोनिवृत्तिस्तर्हि क्वचिदेकदेशोऽप्यनुवर्त्तत इति न्यायेन सिद्धा वस्तुतस्तु दीधीवेवीटामिति सूत्रस्य भाष्य
मेकदेशप्रवृत्तिः आर्धधातुकस्येति सूत्रस्येड्ग्रहणस्य नेड्वशीति सूत्रे भाष्ये प्रत्याख्यानात्कयोगेन ग्रहणत्वरयत्नमा।
श्रित्य तत्प्रत्याख्यानस्यायुक्तत्वात् ९ नन्वलुगधिकारः प्राणानडः ऽडुत्तरपदाधिकारः प्रागंगाधिकाराद्दिम
नुपपन्नमेकयोगनिर्दिष्टत्वात् तथा दामहायनान्ताच्चेत्यादौ संख्याव्ययादेर्ङीप इतः संख्यादेरिति वर्त्तते अव्यया
देरिति निवृत्तमिति चानुपपन्नमत आह ॥ एकयोगनिर्दिष्टानामेकदेशोऽप्यनुवर्त्तते ॥ एकत्रार्थयोगः संब
धस्तेन निर्दिष्टयोः समुदायाभिधायित्वेन तु निर्दिष्टयोरित्यर्थ इति पदातिति सूत्रे कैयटः तावन्मात्रेऽशेस्वा
विनत्वप्रतिज्ञाबलाल्लभ्यमिदम् स्पष्टा चेयं दामहायनान्तादिति सूत्रे आतो मन्शामोरिति सूत्रे च भाष्ये स्पष्टा ९
ननु यदादीनामश्व्यादिनाश्रममित्यादावनुनासिकः स्यादत आह ॥ भाव्यमानेन सवर्णानां ग्रहणं न ॥ आणुदि
त्सूत्रेऽप्रत्यय इत्यनेन सामर्थ्यात्सूत्रमात्रं ज्ञाप्यते गुणाभेदकत्वेन च प्राप्तं नेत्यर्थः अत एवाणुदित्सूत्रेऽम
त्यादेशागमेषु सवर्णग्रहणाभावं प्रकारान्तरेणोक्त्वा एवं तर्हि सिद्धे यदप्रत्यय इति निषेधं शास्ति तज्ज्ञापय
ति भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति किंच ज्यादादीयसः इत्येवानन्तर्यतो दीर्घे सिद्धे ज्यादादि
ति दीर्घोच्चारणमस्या ज्ञापकम् आणुदित्सूत्रे ज्यादादिति सूत्रे च भाष्ये स्पष्टैषा चोः कुरित्यादौ भाव्यमानेनापि

सवर्णग्रहणं विधेयं उदिदुच्चारणसामर्थ्यात् एतदेवाभिप्रेत्य भाव्यमानोऽण् सवर्णान्न गृह्णातीति न।
ण्ः पठन्ति १९ नन्वेवमदसोसेरित्यादिना ऽस्त्रइत्यादौ दीर्घविधानं तस्मादत आह ॥ भाव्यमानोऽप्युका
रः सवर्णान्न गृह्णाति ॥ दिवउदित्यत उदिति तपरकरणमस्याज्ञापकम् तन्न विहितमिति सूत्रे भाष्ये स्पष्टैषा
२० ननु गवे हितं गोहितमित्यादौ प्रत्ययलक्षणेनावाद्यादेशापत्तिरत आह ॥ वर्णाश्रये नास्ति प्रत्ययल
क्षणम् ॥ वर्णप्राधान्यविषयमेतत् तत्रत्यं च प्रत्ययलोप इति सूत्रे स्थानिवदित्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षण।
ग्रहणं प्रत्ययस्येतराविशेषणत्वरूपं यत्र प्राधान्यं तत्रैव प्रवृत्त्यर्थमित्येतत्सिद्धं वर्णप्राधान्यं च वर्णोत्तराविशे
षणत्वरूपं प्रत्ययनिरूपितविशेष्यतारूपं च तेन गोहितमित्यादावबादिन चित्रायां जातश्चित्रेत्यादावण्यो
कारलक्षणानन्ङीवितिङीपू च न इयमलि यो स्थानिवत्ताप्राप्तावपि प्राप्तप्रत्ययलक्षणविधेर्निषेधिकेति स्प
ष्टं भाष्ये २१ नन्वतः कृकमीत्यत्र कमिग्रहणेन सिद्धे कंसग्रहणमव्यर्थमत आह ॥ उणादयोऽव्युत्पन्नानि प्राति
पदिकानि ॥ इदमेवास्याज्ञापकमिति कैयटादयः कमेस्तु न कंसोऽनभिधानात् प्रत्ययस्य गुणेत्यादौ भाष्ये
स्पष्टा एवं लक्षणावित्यादौ भाष्येऽव्युत्पन्नानीत्यपि इदं शाकटायनरीत्या पाणिनेस्तु ऽव्युत्पत्तिपक्ष एवेति शब्देन्दु
शेखरे निरूपितं आयनेयीनीति सूत्रे भाष्ये स्फुटमेतत् २२ ननु देवदत्तश्चिकीर्षतीत्यादौ देवदत्तादेः सन्नन्तत्वादि

प्रयुक्तं स्यात्तत्राप्यप्रवृत्तिः स्यादत आह ॥ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ यस्मात्प्र
त्ययविधिरिति सूत्रे यस्मात्प्रत्ययविधिस्तदादि प्रत्यये इति योगो विभज्यते लक्ष्यमाणोपतिष्ठते इति शेषः तेन त
दाद्यंशः सिद्धस्तदन्तांशस्तु येन विधिरित्यनेन सिद्धः सर्वशब्दस्वरूपं विशेष्यमादाय विशेष्यान्तरासत्त्वे यत्प्रत्य
प. येन स्वप्रकृत्यवयवसमुदायात्तेपादानं विशेषणत्वेन तदन्तविधिरिति तत्र व्यतिसेटुतियानित्यादौ तस्य ताद
शसमुदायेन व्यभिचारेणात्तेषामसंभवात् यत्र प्रत्ययो निमित्तत्वेनाश्रीयते तत्र तदादेस्तदन्तांशमात्रोपस्थि
तिरित्युक्तं स्येति सूत्रे भाष्यकैयटयोः एवं यत्रापि पञ्चम्यन्तात्परः प्रत्ययस्त्राश्रीयते तत्रापि तदादीयन्तांशस्य
हृ स्थितिः एवन्तत्र पञ्चम्यन्ततात्पर्यत एवेदं स्यादिति सूत्रे एवं तदादित्यर्थलाभः अस्याः परिभाषायाः प्रयो
जनान्तरं येन विधिरिति सूत्रे भाष्ये उक्तं परमगार्ग्यायण इति परमगार्ग्यस्यापत्यमिति विग्रहेपि गार्ग्यशब्दा
देव प्रत्ययो न विशिष्टात् निष्कृष्य तावन्मात्रेणो कार्यभावाभावेपि हानिर्भवत्येवायं चेदं भाष्यमेव मानमि
त्यन्यत्र विस्तरः प्रत्ययमात्रग्रहणोपधानेन प्रत्ययाप्रत्ययग्रहणेत्यनुगीतञ्चेत्यत्र भाष्ये इयं मद्रुक्तं सञ्ज्ञा
सूत्रे भाष्ये स्पष्टा २३ येन विधिरिति सूत्रे भाष्ये पठितं तदुक्ततदन्तांशस्यापवादः पठ्यते ॥ प्रत्ययग्रहणे चा
पञ्चम्याः ॥ यत्र पञ्चम्यन्तात्परः प्रत्ययः कार्यान्तरविधानाय परिगृह्यते तत्र तदन्तविधिर्न स्यात् यथा

र्दाभ्यां निष्ठातो नड्भ्यत्र तेन दृषत्तीर्णेत्यादौ धातुतत्कारस्य ननत्वम् तदन्ते त्वंशानुपस्थितावपि तदादीत्वंश
स्योपस्थितौ रेफदान्तात्परस्य निष्ठातस्येत्यर्थः तद्देशानुपस्थितौ मानाभावात् तदन्तांशोपस्थितौ तु भयो
रेकविषयत्वमेव स्यादिति दृषत्तीर्णेत्यादौ दोषः स्यादेवेति स्वतासी ल्लृलुटोरित्यादौ ल्लृलुटोः परयोरित्यर्थे नि
यमेनावधिस्थापेऽत्तत्वेनोपस्थितौ धातोरित्यस्येवावधित्वेनान्वयात् न तदन्तविधिः आशुभ्यश्त्यादौ तु नदो
षः तत्र कस्मादिति नियतावध्याकांक्षाया अभावेन पञ्चम्यन्तस्य प्रत्ययविशेषणत्वाभावात् मकुः सञ्ज्ञास
त्रेतदादेः प्रत्यये परे इत्यर्थे पञ्चम्यन्तस्य विशेषणत्वं स्पष्टमेव अतएवात्र मेकाभ्यामित्यादिनिर्देशः मकुञ्छते
२४ नन्वेवं कुमारीब्राह्मणिरूपेत्यादौ घरूपेति ह्रस्वापत्तिरत आह ॥ उत्तरपदाधिकारे प्रत्ययग्रहणे न त
दन्तग्रहणम् ॥ हृदयस्य हृल्लेखयदण्लासेष्वित्यत्र लेखग्रहणात् तत्र लेख इति नघञन्तमनभिधानात् इयं
च हृदयस्येति सूत्रे एव भाष्ये स्पष्टा २५ नन्वेवं परमकारीषगन्धीपुत्र इत्यत्रैवातिकारीषगन्ध्यापुत्र इत्यत्राप्य
डुः संप्रसारणं पुत्रपत्योरिति स्यादत आह ॥ स्त्रीप्रत्यये चानुपसर्जने न विषयसप्तमी ॥ यः स्त्रीप्रत्ययः स्त्रि
ये प्राधान्येनाहतत्वत दानिदियमो न य स्त्र प्राधान्येनाहत तत्तदादितियमो स्येवेत्यर्थः प्रत्यासत्त्यायस्य समुदा
यस्य स्त्रीप्रत्ययान्तत्वमाने यत्तदर्थं प्रत्यनुपसर्जनत्वमेवैतत्परिभाषाप्रवृत्तौ निमित्तं तेनातिराजकुमारि इत्या

दौराजकुमारीशब्दार्थिस्यातिशब्दार्थेप्रत्ययोपसर्जनत्वेपितदर्थप्रत्ययोपसर्जनत्वानदादिनियमाभावेनङ्स्यासि
द्धिः अतएवपरिभाषायांनशास्त्रीयमुपसर्जनत्वसम्भवात् अस्याःप्रत्ययग्रहणेत्यस्यापवादत्वादेकवाक्य
प. तापन्नत्वाच्चाऽऽपिग्रहणेपदसम्बन्धेनस्त्रीप्रत्ययसामान्यग्रहणेविशेषग्रहणेवाप्रवृत्तिः नतुस्त्रीप्रत्ययाप्र
२० त्ययग्रहणेष्वपीतिचेदमर्थवत्सूत्रेभाष्ये इयंचवाचनिकेवयष्टु·इतिसूत्रेभाष्यस्पष्टा २९ नन्वेवंतरप्तमपो
घइत्यादिनातरबन्तादेः सञ्ज्ञास्यादतआह ॥ सञ्ज्ञाविधौप्रत्ययग्रहणेतदन्तग्रहणंनास्ति ॥ सुप्तिङन्त
मित्यत्रान्तग्रहणमस्याज्ञापकंनचप्रत्यययोः पदसञ्ज्ञायामपिप्रत्ययग्रहणपरिभाषयातदन्तग्रहणस
म्भवात्ज्ञापितेपिफलाभावइतिवाच्यम् पदसंज्ञायाःस्वादिष्वितिविषयेप्रकृतिनिष्ठत्वयापदग्रहणस्य
प्रत्ययमात्रग्रहणत्वाभावात् सुप्तिङन्तंपदमितिसूत्रेभाष्येस्पष्टैषा २ नन्वेवंतत्रभेनकुलस्थितमित्यादौ
नकुलस्थितशब्दस्यक्तान्तत्वाभावात्समासोनस्यादतआह ॥ कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणम् ॥
अस्याश्चकर्मणिक्तान्तेउत्तरपदेः नन्त्वरोगतिः प्रकृतिस्वरइत्यर्थकेगतिरनन्तरइतिसूत्रेऽनन्तरग्रहणंज्ञा
पकम् तद्धिअभ्युद्धृतमित्यादावतिव्याप्तिवारणार्थम् प्रत्ययग्रहणपरिभाषयोद्धृतस्यक्तान्तत्वाभावा १०
देवात्प्राप्तेतद्वैयर्थ्यमतदस्याज्ञापकम् नचाभ्युद्धृतमित्यादौपरत्वात्कृद्गतिर्गतावित्यनेनाभेर्निघातएवेतिवाच्यम्

पादादिस्थत्वेनपदान्तरत्वाभावेनचतदप्राप्तेः अनन्तग्रहणोक्तेनैतत्सामर्थ्यादुत्पादितमप्यात्वनिरा
पितमेवानन्तर्यंरटयत्तइतिनदोषः नचाभ्युद्धृतमित्यादावभिनासमासेऽनन्तरस्योदोःपूर्वपदत्वेपि।
स्वार्थंतदितिवाच्यं कारकादृतेतिसूत्रेकारकादितियोगंविभज्यतत्रगतिग्रहणमनुवर्त्यकारकात्स्व
परंगतिपूर्वपदंक्तान्तमन्तोदात्तमितिनियमेनयाथादिस्वराप्राप्त्याक्तस्वरेणोदात्तत्वसिद्धेः तस्मा
दनन्तरग्रहणंव्यवहितनिवृत्त्यर्थमेवेतिज्ञापकमेवयत्रगतिकारकसमभिव्याहृतंक्तदन्तंतत्रक्तग्रहणे
तद्विशिष्टस्येवग्रहणमपिशक्यातदसमभिव्याहृतस्यकेवलस्यापीत्यर्थः अन्यथानम्याक्तग्रहणविध
येपरत्वादन्ययग्रहणपरिभाषायाबाधएवस्यादित्यपिग्रहणम् अतएवसांकटिनमितिगतिकार
कोपपदानामिति क्तग्रहणइतिचपरिभाषाभ्यांक्तदन्तेनसमासेक्तिविशिष्टादेवाणासिद्धातिनतसं।
कैटिनमितीतिप्रयोगादाख्यायामितिसूत्रोक्तभाष्यसङ्गच्छते अन्यथातत्रकेवलकृतिनित्यस्यापिइन।
णन्तत्वाततनोणिपादितकदोषाउर्वारएवस्यात् स्पष्टंचेदंसर्वसमासेनञ्स्वैइतिसूत्रेभाष्यकैयटयोः गति
रनन्तरइत्यत्रतुगतेःपूर्वपदस्यक्तान्तेउत्तरपदेकार्यविधानात्तत्समवधानेपिकेवलस्यक्तान्तत्वेनग्रहणाद्बा
धम् इयंक्तद्विशेषग्रहणोक्तसामान्यग्रहणेचनतक्तदक्तग्रहणेइत्युपसर्जनादितिसूत्रेभाष्येस्पष्टम् २८

पदाङ्गाधिकारे तस्य तदन्तस्य च ॥ पदमङ्गं च विशेष्यं विशेषणं न तदन्तविधिः । येन विधिरित्यस्यायं प्रप
ञ्चः तेनेष्टकचितं पक्वेष्टकचितमित्यादौ विशेषेकेषीकामालानां चिततूलभारिष्विति ह्रस्वो महान्परममहा
प॰ न्परमातिमहानित्यादौ सान्तमहतः इति दीर्घश्च सिद्धः अत एव तदुत्तरपदस्येति पाठोऽयुक्त इति भाष्ये स्पष्टम्
११ अत्र पदशब्देनोत्तरपदाधिकारः केवलपदाधिकारश्च पादस्य पदाज्यातीत्यत्र न तदन्तग्रहणं लक्ष्याननुरोधादि
ति सर्वं येन विधिरित्यत्र भाष्ये स्पष्टम् २८ नन्वेवमस्यापत्यमिवित्यादावदन्तप्रातिपदिकाभावात् दिञ्न्स्यादत
आह ॥ व्यपदेशिवदेकस्मिन् ॥ निमित्तसद्भावाद्विशिष्टोपदेशो मुख्यो व्यवहारो यस्यास्ति स व्यपदेशी य
स्तु व्यपदेशहेत्वभावादविद्यमानव्यपदेशः सहायः स तेन तुल्यं वर्तते कार्यं प्रतीत्येकस्मिन्नसहाये तत्कार्यं क
र्तव्यमित्यर्थः तेनाकारस्यापि तदन्तत्वात्तद्धितः एकस्मिन्नित्युक्तेः सभासन्नयने आकारस्य तादित्वं द्वि
द्वायानाविकारस्य नानान्तत्वम् अन्यथा सभासन्नयने भवः इत्यर्थे वृद्धत्वाच्छादिद्वाने रविर्णान्त लक्षणोः च च
स्यात् अत एव दरिद्रश्वित्यादौ सोः पदत्वं न लोकेऽपि बहुपुत्रस्त्वेकस्मिन्नज्येष्ठकनिष्ठत्वादिव्यवहारो पुं
से ज्येष्ठः कनिष्ठो मध्यम इति किन्त्वेकपुत्रत्वेऽपि व अनेन चाशास्त्रीयस्याप्यतिदेशः अत एव इयायेत्यादावे
कान्त्वनिबन्धन द्वित्वसिद्धिः अत एव भवतीत्यादौ भू अस्यस्याङ्गत्वमियायेत्यादौ कार्यकालपक्षेऽत द्वि ११

नान्तत्वनिबन्धनप्रातिपदिकत्वं चँष्यति अन्यथा यस्माद्विहितस्तदादित्वाभावान्नस्यात् पदयोरर्थवान्तत्रा
र्थस्य त्यागोपादानाभ्यामेकात्म्यव्यपदेशो यथैषायैत्यादावर्थवतोर्धात्वोरेयं वाक्यरूपएकोजितिकैयटः न
न्न तस्यैकपदाश्रुतित्वं भाष्यकारोक्तरीत्या समुदायव्यवहारस्तत्वादेकपदाश्रितिस्त्वार्थेन प्रोक्तो व्यपदेशइ
तिभाष्येऽयुक्तम् तत्कृत्तादेरर्थवच्छब्दोभयवृत्तितेन तस्याः शब्दमात्ररूपं पदमेकोवयव इत्यर्थ इति तदाशयः
तस्मादेकस्मिन्नन्तर्धर्मारोपेण पुत्राः पद्मयाजपेष्टत्वादिव्यवहारो यथा च शिलापुत्रकस्य शरीरमित्यादावेकस्मि
न्नारोपितानेकावस्थाभिः समुदायरूपत्वाद्यारोपितैस्तस्य शरीरमित्यादिव्यवहारस्तथात्रैकात्म्यादिव्यवहा
रोपपत्तिरिति लोकन्यायसिद्धेयं न चासहाययेप्यैवेन तत्प्रवृत्तौ भवतीत्यत्र भ्रू इत्यस्माद्गुत्वानापत्तिः समुदा
यत्वादिति वाच्यम् शापमादापाङ्गुत्वेकार्थे यस्माद्विहितस्तदादित्वेन समुदायत्वाभावात् लोकेपि वि
जातीयकन्यादिसत्त्वेप्येकपुत्रस्य तस्मिन्नेवायमेव ज्येष्ठ इत्यादिव्यवहारवत् नचैवं निजौ चत्वार एकाच इ
ति भाष्यासङ्गतिः इकारस्यासहायत्वाभावेन तत्रैकाच्त्वानुपपादनादिति वाच्यम् एकस्मिन्नित्यस्यापर्या
लोचनयातत्प्रवृत्तेः अर्थवताव्यपदेशिवद्भाव इत्यत्रार्थवत्पदेनापि असहायत्वमुपलक्ष्यते अर्थबोधके
नशब्देन व्यपदेशिमद्रेशोभावः कार्यं लभत इति तदर्थः प्रायोसहायेएवार्थवत्त्वात् ऊकृत इत्यादौ तश

ह्याकारोच्चामनन्यश्च निव्यवहारे सम्यादिस्येति व्यवहारे चासहायपर्वेतितत्र व्यपदेशिवद्भावेन टिसञ्ज्ञा।
सिद्धिरित्यन्यत्र विस्तरः १९ ननु गर्गादिभ्यो विहितो यञ् तदन्तविधिना परमगार्ग्यादिभ्योपि स्यादत आह
॥ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ इयं च समासप्रत्ययविधौ प्रतिषेधः उगिद्वर्णग्रहणवर्
प॰ जमिति वार्त्तिकस्य प्रथमतृतीयांशानुवादः अतएवायं प्रत्ययविधिविषय एव अतएव येनविधिरिति सूत्रे भा
१२ ष्ये प्रत्ययविधिभिन्नेः अन्त्रित्यादौ ग्रहणमाणप्रातिपदिकेनापि तदन्तविधिप्रतिपादनं स्वमायरमस्वसेत्याउ
दाहरणं च सङ्गच्छते अतएव येनविधिरिति सूत्रे भाष्ये समासेत्यादिनिषेधस्यकथनं व दस्यानकथनं सो
पि निषेधो विशिष्यते तत्र रूपेण गृहीतप्रातिपदिकसूत्रे एव धनितं चेदमसमासे निष्कादिभ्य इति सूत्रे भा
ष्ये अत्र वज्ञापकं सर्वश्च्चेति सूत्रम् अन्यथा सर्वादिनिवित्यत्र तदन्तविधिनैव सिद्धे किं तेन २१ नन्वेवं सत्या
नाद्यकृदशान्तादुः एकरोणं सर्वादित्यादेः केवल सूत्र शब्दस्य दशान्तस्यैक शब्दादिश्चापि ग्रहणं निर्व्यपदेशिवद्भावा
त्स्यादत आह ॥ व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ सर्वान्त सर्वादिनिवित्येकयोगे कर्तव्ये पृथग्योगकर
णमस्याः ज्ञापकम् नन्वेवष्टादिभ्य इति सूत्रे बहुत्वपर्यन्तयापायोः न चैवानिष्टीत्यादिसिद्धिरिति वाच्यम् ज्ञापक १२
परभाष्यप्रामाण्येनानिष्टीत्यादिप्रयोगाणामनिष्टत्वात् एकयोगेपि तावदुत्तरत्रानुवृत्तेर्बाधकाभावाच्च॥

अतएवनानाद्संख्यादेरितिचचरितार्थं अन्यथापञ्चमइत्यादावपिव्यपदेशिवद्भावेनसंख्यादित्वात्तद्वैय
र्थ्यंस्पष्टमेव इयंचप्रातिपदिकग्रहणेनतत्प्रातिपदिकाप्रातिपदिकग्रहणे तेनोगितश्चेत्यत्रनदोषइतित
त्रैवभाष्येस्पष्टे इयंग्रहणवतेतिचपरिभाषाप्रत्ययविधिविषयैवेत्यसमासेनिष्कादिभ्यइतिसूत्रेभाष्यकै
यटयोः तेनाहन्नित्यादेः परमाह्नश्छन्हेकेवलाह्नश्छन्हेचप्रहतिरित्यन्यत्रविस्तरः ३२ ननुवान्तोयीत्यादौ
यादौप्रत्ययेइत्यर्थः कथमतआह ॥ यस्मिन्विधिस्तदादावल्ग्रहणे ॥ तदन्तविधेरपवादोयं वाचनि
केषायेनविधिरित्यत्रभाष्येपठिता अस्याः स्वरूपसतीसप्तमीनिमित्तम् अतएवनेड्वशिकृतीत्यादौवश्या
देः कृतइत्यर्थलाभः इयंचार्द्धधातुकस्येड्वलादेरितिसूत्रेवलादेरित्यादिग्रहणसामर्थ्याद्विशेष्यविशेषणयो
रुभयोरपिसप्तम्यन्तत्वएवप्रवर्तते तेनरुः सिधुडित्यादौमादेः परस्येतिनार्थः नीवसहसेसिचीत्यादौय
यातादेरित्याद्यर्थलाभस्तथाशब्देन्दुशेखरेनिरूपितम् ३३ उटपंद्वटपदावित्यादिसिद्धयेआह ॥ सर्वो
द्वन्द्वोविभाषयैकवद्भवति ॥ द्वन्द्वश्चप्राणीत्यादिप्रकरणविषयः सर्वोद्वन्द्वइत्यर्थः चार्थेद्वन्द्वइतिसूत्रे
णसमाहारेतरेतरयोगयोरविशेषणाद्द्वन्द्वविधानात्प्राप्तसिद्धेयम् तिष्यपुनर्वस्वोरिसूत्रेस्यबहुवच
नस्येतिग्रहणमस्याज्ञापकम् तद्वीदन्तिष्यपुनर्वस्वइत्यत्रतस्याप्रवृत्त्यर्थम् नचैवमप्यत्रजातिरप्राणिना।

मितिनित्यैकवद्भावेन बहुवचनाभावादिदं सूत्रं व्यर्थमिति वाच्यम् तद्धैकत्विकत्वस्याप्यनेन ज्ञापनात्
नैवैते प्राणिन इति वाच्यम् आपोमयः प्राण इति श्रुतेरद्भिर्विनाम्लायमानत्वात्प्राणानामेव प्राणित्वात् स्पष्टं
प॰ चेदं तिष्यपुनर्वस्वोरिति सूत्रे भाष्ये अतएवहन्दूक्ष्मालीत्यादौ प्राणप्रागादीनामेवममाहार इति विपरीत
१२ नियमोन २४ ॥ सर्वविधयश्छन्दसि विकल्प्यन्ते ॥ व्यत्ययो बहुलमिति सूत्रे भाष्ये बहुलमिति योगविभा
गेन षष्ठीयुक्तश्छन्दसि वेति सूत्रे वेति योगविभागेन चैषा साधिता तेन प्रप्रतीयमन्यकं मिर्युध्यन्तीत्यादि सि
द्धम् युध्यते इति प्राप्नोति २५ ननु स्त्रियइत्यादावियङ्कथमत आह ॥ प्रकृतिवदनुकरणम्भवति ॥
स्त्रिय इतीयङ्निर्देशोऽस्याः ज्ञापकः तेनैव प्रातिपदिकत्वनिबन्धनविभक्तिकरणादनित्या चेयमिति।
स्त्रियो दीर्घादिति सूत्रे भाष्ये स्पष्टम् २६ ननु रामाविम्यादौ वृद्धौ कृतायां कार्यकालपक्षे कथं पदत्वं उभय
तः आश्रयणेनादिवत्त्वाभावाद्यस्मात्तिहितस्तदादितदन्तत्वाभावादत आह ॥ एकदेशविकृतमनन्यव
त् ॥ अनन्यवदित्यस्यान्यवन्नेत्यर्थः तत्रान्यस्मादपि निषेधेन्यत्वाभावः सुतराम् अत एव तादृशादपि
बोधकः अन्यथा शङ्कनावच्छेदकानुपूर्व्यज्ञानात्ततो बोधो न स्यात् एवञ्च रामइति मानन्तस्य यस्मा १३
द्विहितस्तत्त्वम् आइत्यस्य परादित्वेन सम्वामिति तदन्तत्वमर्थसमाजग्रस्तं छिन्नपुच्छे शुनि श्वत्वव्यवहारव

त्मान्नेतत्वं लोकन्यायसिद्धम् अत एव प्राग्दीव्यतोऽणिति सूत्रे भाष्ये दीव्यतिशब्दैकदेशदीव्यच्छब्दानुक
रणमित्युक्तम् किमर्थं विकृतनिर्देशः एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा एकदेशविकृतमनन्यवद्
वतीत्युक्तम् एतेनायं न्यायः शास्त्रीयकार्य एव शास्त्रीयविकार एवेत्यपास्तम् विकृतावयवनिबन्धनकार्ये
तु नायम् छिन्नपुच्छे शुनि श्ववत्व्यवहारवद्विकृतावयववत्वव्यवहारस्य तु रूपपादत्वात् एवमक्षपरिमाण
ग्रहणेऽपि नायमुक्तयुक्तेः एतेन विधिरित्यत्र भाष्यकैयटयोर्ध्वनितम् यत्तत्वं हेतदधिकं वा विकृतं तत्र जातिव्य
ञ्जकभूयोऽवयवदर्शनाभावेन तत्त्वाप्रतीतेः कार्यसिध्यर्थं विकृतानल्परूपावयववत्वप्रतीत्यर्थं चष्यानिवन्त्र
त्वं क्वचिल्लक्ष्यानुसारान्न्यायानाश्रयणात् तेनाभीयादित्यादिसिद्धिः स्पष्टं चेदं क्वचिन्न्यायाप्रवृत्तिः प्रथमयोः पूर्व
सवर्ण इत्यत्र कैयटेन दर्शितमित्यन्यत्र विस्तरः ३७ ॥ पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ॥
पूर्वात्परं बलवत् विप्रतिषेधशास्त्रात्सर्वस्य परं बाधकमिति यावत् ३८ नन्वेवं भिन्धीत्यत्र परत्वात्तातङा बा
धितोऽपि धिः स्यादत आह ॥ पुनः प्रसङ्गविज्ञानात्सिद्धम् ॥ ३९ नन्वेवं तिसृणामित्यत्र परत्वात्त्रिसादेशो नु
त्र्यादेशः स्यादत आह ॥ सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ अत्र क्वचिद्वर्तितार्थयोरेकस्मिन्युगप
दुभयोः कार्ययोरसम्भवेन बाधकाभावात्पर्यायेणान्यादिवद्द्वादशहयप्रसङ्गे नियमार्थं विप्रतिषेधसूत्रमिति स

कृद्गतिन्यायसिद्धिः यथा तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति यदा तमुभौ युगपत्प्रे
षयतो नानादिक्षु च कार्ये तदोभयोर्न करोति यौगपद्यासम्भवात् यथा शास्त्रयोर्लक्ष्यार्थयोः क्वचिल्लक्ष्ये यौ
प० गपद्येन प्रवृत्त्यसम्भवादप्रतिपत्तौ प्राप्तायामिदं परविध्यर्थम् तत्र कृते यदि पूर्वस्य प्राप्तिरस्ति तर्हि तदपि
१५ भवत्येवेति पुनः प्रसङ्गविज्ञानसिद्धिरिति विप्रतिषेधसूत्रे भाष्ये स्पष्टम् यत्तु कैयटादयो व्यक्तिपदार्थप्रति
15 लक्ष्यं लक्षणोपप्लवादुभयोरपि शास्त्रयोस्तत्तल्लक्ष्यविषययोश्चारितार्थ्यं न पर्यायेण द्वयोरपि प्राप्तौ परमेवे
ति नियमार्थमिदमिति सकृद्गतिन्यायसिद्धिः अत्र पक्षे एतन्नियमवशादेतल्लक्ष्यविषयकं पूर्वशास्त्रान
पलब्धमेव जातिपक्षे तु उद्देश्यतावच्छेदकाक्रान्ते क्वचिल्लक्ष्ये चरितार्थयोर्द्वयोः शास्त्रयोः सत्प्रतिपक्षन्या
येन युगपदुभयासम्भवरूपविरोधस्थले उभयोरप्यप्राप्तौ परविध्यर्थमिदमिति पुनः प्रसङ्गविज्ञानसि
द्धिरिति तत्र व्यक्तिपक्षे सर्वं लक्ष्यं शास्त्रं व्याप्नोति न जातिपक्षे इत्यत्र मानाभावात् न ब्राह्मणं हन्यादित्यादौ
जात्याश्रयसकलव्यक्तिविषयत्वार्थमेव जातिपक्षाश्रयणस्य भाष्ये दर्शनात् अत एव सरूपसूत्रे भाष्ये जा
तौ पदार्थे न चावयवेन साकल्येन विधेः प्रवृत्तेर्गौरनुबन्ध्य इत्यादौ सकलगवानुबन्धनासम्भवात् कर्मणो वै १५
गुण्यप्रसक्तम् इत्याक्षेपे च सर्वद्रव्यगते गौरनुबन्ध्य इत्यादावेकः शास्त्रार्थः परो शास्त्रार्थ इत्युक्तम् किंच

भाष्ये ऽकृत्यादिदृष्टान्तस्य व्यक्तिपक्ष एव सर्वविषयत्वं न जातिपक्षे इत्यत्र न मानमस्ति अपि च व्यक्तिप
क्षेऽप्यन्यव्यक्तिरूपविषयलाभेन चरितार्थयोर्द्वयोर्व्यक्तिविरोधात्सर्वविषयकत्वं न कल्पयतीति वक्तुं शक्यम्
जातिपक्षेऽपि तज्जात्याश्रयतद्व्यक्तिविषयकत्वमित्यत्र विनिगमनाभावः तत्र लक्ष्यानुसारात्क्वचिज्जातीय
दृष्टान्ताश्रयणं क्वचिल्लौकिकदृष्टान्ताश्रयणमिति भाष्यसंमतमार्ग एवेत्युक्तमिति बोध्यम् द्वयोः कार्य
योर्यौगपद्येनासम्भव एव विप्रतिषेधशास्त्रप्रयोग इदमिको गुणो सूत्रे कैयटे स्पष्टम् यथा शिष्यादित्यादौ तानङ्
शाभावयोर्युगपत्प्रवृत्तौ सत्स्वनिमित्तानन्तर्यासम्भवः यद्यपि तातङादेशस्य स्थानिवत्वेनास्त्येव तत् तथा।
प्यादेशप्रवृत्तेरुत्तरमेव सः न तत्प्रवृत्तिकाले एवं नुम्तृज्वत्त्वयोः प्रियक्रोष्टूनीत्यादौ युगपदसम्भवः
यदागमा इत्यस्य स्वनुमग्रहस्तत्तरम्प्रवृत्तेः एवं भिन्धीत्यादौ तातङ्धिभावयोर्युगपदेकस्थानिसम्बन्धस्याङ्ग
रूपनिमित्तानन्तर्यस्य चासम्भवो बोध्यः न सुदोरपि वृद्धेःजादिविभक्त्यानन्तर्यं वा यः नुमिदृशान्ताङ्न्वाय
इत्यसम्भवाद्विप्रतिषेधः क्वचिदिष्टानुरोधेन पूर्वशास्त्रस्य रितत्वप्रतिज्ञाबलात्स्वरितेनाधिकं कार्यमित्य
धात्पूर्वमेव भवति तेन सर्वे पूर्वविप्रतिषेधाः संगृहीता इति स्वरितेनेति सूत्रे भाष्ये विप्रतिषेधसूत्रस्य परश
ब्दस्येष्टवाचित्वादनन्तसंग्रह इति विप्रतिषेधसूत्रे भाष्ये ४ ननु एवमेधते पचते इत्यादौ परत्वाद्विकरणेऽनुदात्तङि

तङित्यादिनियमानुपपत्तिस्तेन व्यवधानादत आह ॥ विकरणेभ्यो नियमो बलीयान् ॥ अत्र हृद्ग्रः स्मृतेना

प॰ रितिसूत्रेणास्य विभाषा तङः विधानं ज्ञापकम् अन्यथास्य व्यवधानेन नियमानामप्रवृत्तौ सामान्यशास्त्रेणोभ

१५ यपक्षिताविकल्पविधानं व्यर्थं स्यात् अत्रार्थे ज्ञापिते तु स्येरिति तत्र विषयसप्तमी बोध्येति अनुदात्तङितः तत्रात्म

15 नेपदमित्यत्र भाष्यकैयटयोः स्पष्टम् विकरणव्यवधानेपि नियमप्रवृत्तौ इदं ज्ञापकमिति शदेः शित इत्यत्र

भाष्ये ध्वनितम् वस्तुतोऽस्माज्ज्ञापकादनुदात्तङितः तङित्यादिप्रकरणानि तिवादिविध्येकवाक्यतया विधायकं

तत्र धातोरिति विहितपंचमीति तिङन्तसमानाधिकरणामनुदात्तङितः तङित्यादिविहितविशेषणमेव एवञ्च ला

वस्थायां स्येपि न व्यवधाने तङ्क्षितिः शपादिभ्यस्तु पूर्वमेव नियमः यद्वा लमात्रापेक्षत्वादन्तरंगात्वादे

शलकारविशेषापेक्षत्वात्स्यादयो बहिरङ्गा इति दिग्योगलक्षणपञ्चम्यामपि न दोषः अत्र पदे हृद्ग्रहः स्येति

सूत्रे स्यविषये इति व्याख्येयम् आत्मनेपदशब्दो हि भाविसंज्ञाऽऽश्रयणीयेति न तैर्भिन्नवाक्यतया सामान्य

शास्त्रविहिता नानियमे तल्गादिनेव नियमे न जातनिहतिरंगीकार्या भुक्तवन्तं प्रति माऽक्षम्या इति ब्रू

या किं तेन कृतं स्यादिति न्यायस्तु नात्र शास्त्राश्रियत्वं शक्यः नियमादिशास्त्राणां वैयर्थ्यापत्तेः ध्वनितं चे

दं स्थानेन्तरतम इति सूत्रे भाष्ये इग्यणानर्थक्यं तत्र हि संज्ञासूत्रे भाष्ये तिरस्कृतम् सामान्यशास्त्रेणाप्तेति १५

स्वसदृशपरिभूतस्यैकदेशेश्यरीत्या प्रधानानुरोधेन गुणाभेदकल्पना तावत्प्रकृतिकल्पनया कार्यप्रत्ययनिवृत्तौ
च तत्कल्पितप्रकृतेरपि निवृत्तिः कल्प्यत इति गौरवमित्यन्यत्र विस्तरः परान्नित्यं बलवत् कृताकृतप्रसंगित्वात्
तत्राल्पकालभावकस्याभावकल्पनापेक्षयाल्पकालभावस्यैव तत्कल्पनमुचितमिति नित्यस्य बलवत्त्वे बीजं तदाह
४२ ॥ कृताकृतप्रसंगी नित्यं तद्विपरीतमनित्यम् ॥ अत एव तुदतीत्यादौ परादपि गुणान्नित्यत्वाच्छप्रत्ययादिर्भ
वति ४३ यद्व्यक्तिसंबंधितया पूर्वं प्रवृत्तिस्तद्व्यक्तिसम्बन्धितयैव पुनः प्रवृत्तौ कृताकृतप्रसंगित्वमित्याशयेना
ह ॥ शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति ॥ इदं शब्देः शित इति सूत्रे भाष्ये स्पष्टम् तत्र हि स्वविशसेरश्वविकर
णे कृते तदंतस्याङ्कृते यातमात्रस्यैतस्य इनित्यश्चक्तम् ४४ एतत्तुल्यन्यायेनाह ॥ शब्दान्तरात्प्राप्नुवतः शब्दान्त
रे प्राप्नुवतश्चानित्यत्वम् ४५ एतन्मूलकमेवाह ॥ लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ॥ अतिदेशविषयेऽयम
सिद्धवत्सूत्रैकदेशेनोक्ता ४६ यदा तु शास्त्रव्यतिरेकेण न तद्विधेयकार्ययोरेव नित्यत्वादिविचारो यद्यपि व्यक्तिविशे
षाश्रयणाभावस्तदाह ॥ क्वचित्कृताकृतप्रसंगित्वमात्रेणापि नित्यता ॥ कृते द्वितीये नित्यत्वेनाभिमतस्य प्रसं
गमात्रे नित्यत्वव्यवहारे प्रयोजकं न तु बाधकाबाधितफलोपहितप्रसंगोपीति भावस्तदाह ४७ यस्य च लक्षणा
न्तरेण निमित्तं विहन्यते न तदनित्यम् ॥ क्वचित्तु बाधकाबाधितफलोपहितप्रसङ्ग एव दृश्यते तदाह ४८ यस्य

लक्षणान्तरेणनिमित्तंविहन्यतेतदप्यनित्यम् ॥ सप्तमेकैयटेनयत्तदुपष्टंभकंलोकव्यवहारद्वयमुदाहृतम्
वालिसुग्रीवयोर्युध्यमानयोर्भगवतावालिनिहतेपिसुग्रीवस्यवालिनःप्राबल्यंनव्यवहरन्तिभगवत्सहायेपाण्ड
वैर्जयेलब्धेपिपाण्डवानांप्राबल्यंव्यवहरन्तिसर्वंचेदंलक्ष्यानुरोधाद्व्यवस्थितम् ॥ लुङः प्रथमस्येति सूत्रे भाष्ये स्वर
प० भिन्नस्यचप्राप्नुवन्विधिरनित्यइतिपठ्यते तत्रैकस्यैवकार्यस्यपरत्वंनित्यत्वंच तत्रैकयान्यतरत्तदुभयंवातस्यब
१९ लवत्त्वेनियामकमुल्लेख्यम् अतएवतत्रतत्रपरत्वान्नित्यत्वाच्चेतिभाष्येउच्यते वस्तुतस्तुपरत्वादिसूक्तिरेकदेशि
नः स्पष्टंचेदंविप्रतिषेधसूत्रेकैयटे णौचङीतिसूत्रापेक्षयानित्यत्वान्तरङ्गत्वप्रयुक्तंहितस्यप्रथमतःप्रवृत्तौ
नित्यत्वादित्येवभाष्येउक्तम् एवंनित्यान्तरङ्गयोर्बलवत्त्वमपियौगपद्यासम्भवेएवबोध्यम् नित्यादप्यन्तर
ङ्गंबलीयोन्तरङ्गंवहिरङ्गस्यासिद्धत्वात्तत्राह ॥ असिद्धंवहिरङ्गमन्तरङ्गे ॥ अन्तर्मध्येवहिरङ्गशास्त्रीय
निमित्तसमुदायमध्येन्तर्भूतान्यङ्गानिनिमित्तानियस्यतदन्तरङ्गम् एवंतदीयनिमित्तसमुदायाद्बहिर्भूता
ङ्गकंवहिरङ्गम् एतच्चखरवसानयोरितिसूत्रेसिद्धवत्सूत्रेचभाष्यकैयटयोःस्पष्टम् अत्राङ्गशब्देनशब्दरूपं
निमित्तंगृह्यतेशब्दशास्त्रेतस्यप्रधानत्वात् तेनार्थनिमित्तकस्यनवहिरङ्गत्वम् अतएवनातिस्त्रीतिनिषेधश्च १९
रितार्थः अन्यथाह्येतन्निमित्तकनिषेधापेक्षयान्तरङ्गत्वाद्यणादेशोनतदसङ्गतिः स्पष्टैव अतएवउयादेशस्तनस्य

प्रतिषेधपरत्वे तिस्यानिवर्त्तकत्वस्य भाष्यवार्त्तिकादिसङ्गच्छते एतेन गौर्येवः पचेरन्निन्यादावेयादीनामङ्गसञ्ज्ञा
पेक्षत्वेन वहिरङ्गत्वात् यासिद्धत्वाद्धलिलोपो न स्यादिति परास्तम् यणादेशादेरपरनिमित्तकत्वेनान्तरङ्गत्वाच्च
ननु येन विधिस्तदन्तस्येति सूत्रे भाष्ये इको यणचीत्यादावपि तदन्तविधेः स्यान्नइत्यन्नान्तरङ्गत्वाद्यणो गुणो बा
धकत्वमिष्यते तन्न सिध्येत् ऊनशब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुणः इत्यन्तरङ्गत्वाद्गुण एव स्यादि
त्युक्तम् अत्रैके यदः सिवेर्वा ऊ लकादेशे णादिके न प्रत्यये गुणे वलोपो ठंस्यमङ्गं ऊठ एव वादत्वाद्धलोपं वाप
ते गुणं बन्तरङ्गत्वाद्वाधते गुणोप्यङ्गसम्बन्धिनीमिरलन्तराङ्गं लघ्वीमुपधामपेक्षतेकं वाश्रयति ऊठ् तु व।
कारान्तमङ्गं मनुनासिकादिञ्च प्रत्ययमित्यस्यापेक्षत्वादन्तरङ्गं स्वल्पकृते यणा गुणो प्रामुवत इति एवञ्च सञ्ज्ञा
पेक्षस्यापि वहिरङ्गत्वं स्पष्टमेवोक्तमिति चेन्न तदन्तविधावपि वकूपदार्थापेक्षत्वेनैव वहिरङ्गता स्पष्टा एसे व
न तत्र दोषकथनपरभाष्यासङ्गतेः वहिरङ्गान्तरङ्गशब्दाभ्यां वक्षपेक्षत्वाल्पापेक्षत्वयोः शब्दमर्यादयालाभा
च्च तथा सत्यसिद्धेवकापेक्षमल्पापेक्षेति रत्येवं वदेत् अत एव विप्रतिषेध सूत्रे भाष्ये गुणाय यणादेशोन्तरङ्गत्वादित्यस्य
स्यान इत्युदाहरणे न त्त गुणाहृदन्तरङ्गत्वादित्युक्तम् न वदीत्यातदपिकल्पसूचितमायमादन्तदेवकर्मसूचितम्॥
ममत्वल्पत्वरङ्गपरिभाषया तदाश्रणासम्भवात्तत्रोक्तम् किञ्च सिद्धान्ते नित्यत्वाद्गुणात्पूर्वं पूठ्येण लिखेण।

बाधितत्वादनित्यः ऊनशब्दमाश्रित्येत्यादिभाष्यप्रामाण्याच्च परिभाषायामङ्ग-शब्देन समभ्यायन्ततयापात्तंशब्दरूपं
निमित्तमेव गृह्यते इति स्पष्टमेवोक्तम् यत्तु कैयटेन तदन्तविधिपक्षे परत्वाद्गुणः प्राप्नोतीत्युक्तं तत्तु ऊनश
प॰ ब्दमाश्रित्येत्यादिभाष्यासङ्ग-त्याचिन्त्यं वलिलोपेःतरङ्ग-परिभाषानप्रवर्त्तनमिति तन्नयुक्तम् तत्सूत्रे भाष्ये
१७ वव्रश्चादिषु वलोपातिप्रसङ्ग-माशंक्योपदेशसामर्थ्यान्न नचहृश्चतीत्यादौ चारितार्थ्यं बहिरङ्ग-तया संप्रसार
17 णस्यासिद्धत्वेन पूर्वमेव तत्प्राप्तेरिति भाष्योक्तेः यत्तु नलोपस्य षट्सञ्ज्ञायामसिद्धत्वात्पंचेत्यत्र नषडितिनिषे
धः स्यादुक्तम् तच्चिंत्यम् नलोपस्य हि यत्संज्ञासापेक्षत्वेन बहिरङ्ग-त्वं वाच्यं तच्च न सञ्ज्ञाकृतबहिरङ्ग-त्वस्याना।
श्रयणात् पंचेत्यत्र निषेधस्तु क्रियायत्नप्राप्नोतीति तन्नेति व्याख्यानसामर्थ्यान्न भूतपूर्वषट्त्वमादायेति बोध्यम् अ
तएव क्वतितग्रहणं चरितार्थं वृत्रहभ्यामित्यादौ पदत्वनिमित्तकत्वेपि नलोपस्य बहिरङ्ग-त्वाभावात् भ्यामः
पदसंज्ञानिमित्तत्वेपि नलोपस्य तन्निमित्तकत्वाभावात् परंपरया निमित्तकत्वमादायैव बहिरङ्ग-त्वाश्रयणेन
नमानम् ध्वनितं चेदं नलोपः सुविति सूत्रे भाष्ये इति तत्रैव भाष्यप्रदीपोद्योतेन निरूपितम् अन्तरङ्गे कर्त्तव्ये।
जाते तत्कालप्राप्तिकं च बहिरङ्ग-मसिद्धमित्यर्थः वृश्चत्यादिषु पदसंस्कारपक्षे समानकालत्वमेव द्वयोरिति १७
बोध्यम् एतेनानन्तरङ्गं बहिरङ्गाद्बलीय इति परिभाषान्तरमित्यपास्तम् एतामाश्रित्य विप्रतिषेधसूत्रे भाष्ये

तस्याः प्रत्याख्यानाच्च अन्तरङ्गःशास्त्रत्वमस्याः लिङ्गम् इयं च त्रिपाद्यां न प्रवर्तते त्रिपाद्या असिद्धत्वात् अस्या
श्च वाहऊठिति सूत्रस्थमूठ्ग्रहणं ज्ञापकमित्येषा सपादसप्ताध्यायीस्था अन्यथा संप्रसारणमात्रविधानेन लघू
पधगुणो वृद्धिरेचीति वृद्धौ विश्वौह इत्यादि सिद्धे स्तुहेयवर्थस्य ऊठमेव सत्यां ह्रितसंपद्य वहिरङ्गःस्य संप्रसारणस्या
सिद्धत्वाल्लघूपधगुणो न स्यात् न च पुगन्तेति सूत्रे निमित्तमिको विशेषणम् अत एव भिनत्तीत्यादौ न गु।
णः एवञ्च गोजानन्तर्ये इति निषेधात्कथं परिभाषाप्रवृत्तिरिति वाच्यम् प्रत्ययस्याङ्गाशे उपस्थिताकांक्षते
न तेनैवान्वयात् पुगन्तेत्यादौ कर्मधारयाश्रयणेन प्रत्ययपराङ्गं एव पवल लघूपधाङ्गे पेकोगुण इति इको गुणावृ।
द्धीति सूत्रभाष्यसम्मतेर्थे भिनत्तीत्यादावदोषाच्च अकारान्ताय सौ न कारान्ते चोपपद्देवहे वाहे वा विवि
चावनभिधानं स्तलपव वाहे ऊ इत्यादिनऊहतेः किपि वाच्यम् धातूनामनेकार्थत्वात्प्रार्थ्या सङ्गतिः प्रोह इत्या
द्यसाध्येवहोहेरप्राप्तेः अस्याहशास्त्रस्यानर्थकत्वात्प्राप्राहहो ढमस्यापि प्रवृत्तिः न च कार्यकालपक्षे त्रिपाद्या
मेतस्या ह नि ढे वेरेति वाच्यम् पूर्वं प्रतिपरस्यासिद्धत्वादनन्तरङ्गाभावे न पूर्वं स्यात् त्रिरूपितवहिरङ्गत्वाभावात्तथा
तस्यासिद्धत्वप्रतिपादनासम्भवात् न चानया पूर्वस्यासिद्धत्वादभावेन तं प्रतिपराःसिद्धत्वं पूर्वत्रेत्यनेनवक्तुम।
शक्यमितिवाच्यम् एवं हि विनिगमनाविरहादुभयोरप्यप्रवृत्त्यापत्तेः किं च पूर्वत्रेत्यस्य प्रत्यक्षत्वेन तेनानुमाति

कर्मस्याबाधएवोचितः अतः कार्यकालपक्षेपि त्रिपाद्यामस्या अनुपस्थितिरेव अत एव कार्यकालपक्षमेवोप
क्रम्याकृष्यकीरुक्रान्तोः उक्तोयंशिद्धारोनवाबहिरङ्ग-लक्षणत्वादित्युक्तं विसर्जनीयस्येत्सिद्धेतिनाभाष्येपि।
पादीस्यन्तरङ्ग-कर्तव्येयंपरिहारोयुक्तइतितदर्थः किन्तुवचनमेवारब्धव्यमितितदाशयः अतएवनिगा-
प० लयतेरित्यादौ लत्वार्थं तस्यदोषइतिवचनमेवारब्धम् अन्यथान्तरङ्ग-त्वात् णिलोपात्पूर्वं वैकल्पिकलत्वेनेष्टे
१८ यद्ध्येस्पष्टमेव येपि लक्ष्यानुरोधादानमानिक्यायन्तरङ्ग-परिभाषाप्रत्याख्यानसिद्धस्य सर्वत्रेमस्यवादं वदन्ति तेपि।
लक्षणचक्षुभिर्नादर्तव्या इति दिक् अतएवोमाङोश्चेत्यत्रापि आद्गुणं च वितार्यम्। तद्धि विद्वांसाङ्गठेत्यत्र परम।
पिस्ववर्णादीर्घबाधित्वान्तरङ्ग-त्वाद्गुणेकृते हृदिमात्रेोपरत्वपार्थसाधनवोपप्रत्ययात्यत्वनन्तरं सूर्वं धातोरु
पसर्गयोगे पश्चात्त्वद्वाशब्दस्य समुदायेन योगाद्गुणस्यान्तरङ्ग-त्वमितिसंप्रसारणाच्चेतिसूत्रेभाष्येस्पष्टम्
पहेत्यनुकरणस्य शिवादिशब्दसमन्वयेतनास्यप्रहृन्निर्दिष्टीयकपरत्वंसंप्रसारणाच्चेतिसूत्रस्थभाष्यप्रामाण्येप
नानित्यंप्रकृतिवदनुकरणमित्यतिदेशमादायलभ्याद्बहि-यतएवप्रवृत्तेः। यत्र पूर्वं धात्वसूपसर्गेणयुज्यते पश्चा
त्साधनेन उपसर्गेणतत्संज्ञकशब्देन साधनेन कारकेणाततस्युक्तकार्येण। अतएवानुभूयते इत्यादौ सकर्म। १८
कत्वाकर्मणिलकारसिद्धिरितितत्र क्रियायाःसाध्यत्वेनवोधात्साध्यस्य च साधनाकांक्षत्वात्तयातत्सम्बन्धोत्तरेम

वक्रियायोगनिमित्तोपसर्गसंज्ञकस्य सम्बन्धो विज्ञायेत् अत एव सुट्कात्पूर्व इति सूत्रे पूर्वं धातुरुपसर्गेण यु
क्तानेत त्सांस्पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेत्युक्तोक्तश्च तथाः से च भुक्तवमुक्तं साधनं हि क्रियां नि
वर्त्तयतीत्यादिना उपसर्गयोत्पत्यार्थोल्लभावे णाथानेवार्थाभिधानाद्युक्ते एकमपि लकारादिसिद्धिः पश्चा।
कृतेर्वा धायधोत्तकोपसर्गसम्बन्धः एवं चान्तरङ्गत्वार्थकोपसर्गनिमित्तः सुट्संकृति इत्यव स्यायो द्दिवा।
दितः पूर्वप्रवर्त्तते ततो द्वित्वादिः अत एव प्रणिददापयतीत्यादौ णत्वं यदागा इति न्यायेन समाहितं भाष्ये अत ए
व प्रत्येति प्रत्ययः इत्यादिसिद्धिः अन्यथान्तरङ्गत्वात्सवर्णदीर्घे रूपासिद्धिः यदुपसर्गनिमित्तं कार्यं उपसर्गार्था
श्रितं विशिष्टोपसर्गनिमित्तत्वात्तदन्तरङ्गं यत्तु न तथा तत्सर्वागतसाधननिमित्तकमेवान्तरङ्गम् अत एव न धा
त्विति सूत्रे प्रेद्ध इत्यत्र गुणो बहिरङ्ग इति भाष्ये उक्तम् किं च पूर्वमुपसर्गयोगो धातूपसर्गयोः समासे एकस्वर्या
घायत्तिरिति दुरुपपदमतिङ् इति सूत्रे भाष्ये स्पष्टम् भावार्थप्रत्ययस्यापि पूर्वमेवोत्पत्तिरत एव गतिरप्यते इति निर्दे
शः संगच्छते इदं च सामान्यापेक्षं साधकं भवति ङ्गेपि पूर्वमुत्पत्तेः अन्यथा तत्र समासाप्तिः तिङि त्वतिङि
ति निषेधान्न दोषः यदि भावतिङ्युपसर्गयोगोस्ति इत्यलम् यत्तु विशेषापेक्षं सामान्यापेक्षमन्तरङ्गं विशेषापेक्षे ५
विशेषधर्मस्याधिकस्य निमित्तत्वात् यथा रुदादिभ्यः सार्वधातुक इत्यत्र रुदादित्वं सार्वधातुकत्वं च तत्र सार्व

यात्तकत्वज्ञानापग्रकृतेयात्तत्वज्ञानंप्रत्ययस्याप्रत्ययत्वज्ञानंचावश्यकमितियावदुन्तरङ्कुः एतेनयदन्नुदात्तादि॰
तरतिसूत्रेकैयटेनोक्तंलमाद्यापेक्षत्वान्तरङ्कुणानिवादयोलकारविशेषापेक्षत्वाद्बहिरङ्कुः स्यादयइतितन्नरा।
प॰ स्तम् विशेषापेक्षत्वेपितस्यसामान्यपर्मनिमित्तकत्वाभावेनतत्त्वस्यदुरुपपादत्वात्प्रत्ययनिमित्तकत्वेनस्यादीना।
१५ वहिरङ्कुत्वाच्चेतितत्र विशेषस्यव्याप्यत्वेनव्यापकस्यानुमानेनोपस्थितावपितस्यनिमित्तत्वमानाभावेनापि
19 कधर्मनिमित्तकत्वानुपपादनात्। भाष्येप्येवंविधान्तरङ्कुभावस्यकाप्यनुल्लेखाच्च यत्तमतुप्सूत्रेभाष्येपंच
गावोयस्यसंतिसपञ्चगुरित्यत्रमतुप्प्राप्नोतीत्याशंक्यप्रत्येकमसमर्थत्वात्समुदायादप्राप्तिरधिकत्वात्समा।
सात्समासेनोक्तत्वादितिसिद्धान्तिनोक्तेनेनतत्त्वात्रम् उक्तेपिद्विप्रत्ययार्थइत्यघतेद्विगोस्तद्धितोयथापांचना
पितिरितिपूर्वपक्षस्तत्रभाष्येद्विगोर्लुगनपत्यइतिलुग्विधानात्तद्धितार्थाद्विगोस्तद्धितोभवतियज्ञशष्क
द्विगुरितितदाशयंकैयटः ततोद्विमातुरःपांचनापितिः पंचसुकपालेषुसंस्कृतइत्यादौसावकाशद्विगोर्व
हुव्रीहिणाप्रकृतेपरत्वाद्बाधइत्याशयकेननेषद्विगुः कस्तर्हिबहुव्रीहिरितिसिद्धान्तिनोक्तेतमवकाशमज्ञाना
नोऽपवादत्वाद्द्विगुःप्राप्नोतीतिपूर्वपक्षीअन्यपदार्थेसुवन्तमात्रस्यविधीयमानबहुव्रीहेः संख्यायास्तद्धिता
र्थेविधीयमानोद्विगुर्विशेषविहितत्वाद्बाधकःप्राप्नोतीतिकैयटः ततःसिद्धान्त्येकदेशपाहान्तरङ्कुत्वाद्बहुव्रीहि १५

द्विः कान्तरङ्गत्वात् अन्यपदार्थे बहुव्रीहिर्विशिष्टे अन्यपदार्थे द्विगुस्तस्मिंश्चासन्नत्वात् द्वितेः स्ति ग्रहणं क्रियते इ
ति अधिकारस्य संख्यापेक्षत्वमन्यथा निमित्तो द्विगुर्बहिरङ्गः इति कैयटः नैषा सिद्धान्तयुक्तिः एतावतापि अपवादत्वाद्बा
ह्नेः अत्र सामान्यापेक्षत्वेन योगविशिष्टस्य वर्णोजपेक्षत्वे दीर्घेण बाधदर्शनात् किं चोक्तरीत्या परत्वेनैव बाधसिद्धेः
किं चात्राधिकापेक्षत्वेनैव बहिरङ्गत्वं न केवलं विशेषापेक्षत्वेनेति नैतद्भाष्यारूढं विशेषापेक्षस्य बहिरङ्गत्वम् ॥ २
अत एव सुबन्तसामान्यापेक्षो बहुव्रीहिस्तद्विशेषापेक्षो द्विगुरिति नोक्तं भाष्ये न चार्थकृतबहिरङ्गत्वानाश्रय
णादिदमयुक्तम् एकदेशयुक्तित्वेनादोषात् अत एवास्तिग्रहणेनापार्थक्ये विंशतिशब्दात्मकत्वेऽर्थमिति त
दभिमतबहिरङ्गत्वमपि द्विगोर्नास्तीति प्रतिपाद्य सिद्धान्तिनामतत्वैर्थद्विगोः प्रतिषेधो वक्तव्य इति वचनेनैतन्नि
द्दमित्युक्तम् अत एव तदोः सः सावनन्त्ययोरिति सूत्रेऽनन्त्ययोरिति चरितार्थे अन्यथा प्रत्ययसामान्यापेक्षत्वेनान्तरङ्ग
त्वादन्यस्यानेनान्यस्यैव सत्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव पादः यदिति सूत्रे भाष्ये के यदयोरप्यन्तरङ्गत्वाभाव एवं
सूचितः सुधियो विभावयन्तु ४ नन्वेवमसत्त्ववदिन्मयलच्युपपत्तुण्णाद्रुवडेनस्य निमित्तत्वाभावाद्बहिरङ्गं न स्या
दिति चेन्न तत्रान्तःकार्यत्वरूपान्तरङ्गत्वसत्त्वात् अतः कार्यत्वं च शब्दोपस्थितनिमित्तकत्वमङ्गः शब्दस्यानिमित्त
परत्वात् इदं अन्तरङ्गत्वं लोकन्यायसिद्धमिति मन्तव्यम् यथा प्रातरुत्थाय शरीरकार्याणि करोति ततः सुहृदां ततः
ने

सम्बन्धिनाम् अर्थानामपि जातिव्यक्तिलिङ्ग-संख्याकारकाणां बोधक्रमः शास्त्रकल्पितक्रमेणोपतिष्ठते थक
शब्दप्रादुर्भावः कल्पितः इति तत्क्रमेणोपतिष्ठन्ते कार्याणीति यचेत्यादावन्तरङ्ग-त्वात्सर्वे सर्वे यणादेशः पश्चयणादेश
प॰ स्य वहिरङ्ग-तयाऽसिद्धत्वादित्यादिनाऽचः परस्मिन्निति सूत्रे भाष्ये स्पष्टम्। तदपि युगपत्प्राप्तौ सर्वेः सर्वप्रवृत्तिनि
२० यामकमेव यथा पट्व्यत्र पदस्य विभज्यान्वाख्यानेन तज्जातस्य वहिरङ्ग-स्य तादृशेऽन्तरङ्गेऽसिद्धतानियामकं
प्राग्युक्तलोकन्यायेन तत्रैव लाभादिति वाहऊठ् सूत्रे कैयटे स्पष्टम् अत एव वाह्यादित्यादौ वलिलोपो यणः स्था
20 निवत्त्वेन वारितो भाष्यकृता क्रमेणान्वाख्यानेन तदुक्तोदाहरणे सर्वे सर्वे प्रवृत्तिकत्वमन्तरङ्ग-त्वं वहिरङ्ग-स्यासिद्धत्व
मपि निमित्ताभावात् स्थानिरूपं बोध्यं यत्त्वेवं रीत्या सर्वस्यानिकमप्यन्तरङ्ग-मिति तच्चिन्त्यं स्त्रीजिघृक्षत्यादौ विस्तेः।
लौकिकीलोपस्यापवाद इति मतो लुक्प्रवृत्त्या जातिपक्षाश्रयणेन वारणाप्रायासस्य सहैपकाजिति सूत्रप्रयोज
नाभावाऽऽनवसरे भाष्यकृत्कृतस्य नैष्फल्यापत्तेः तद्धकारीत्यादि मतौ लौकोवहिरङ्गासिद्धत्वेनानायासतः।
१ द्वारणात् भाष्येऽदृशी यावहिरङ्गासिद्धत्वस्य काप्यनाश्रयणाच्च परिभाषायामङ्ग-शब्दस्य निमित्तपरत्वाच्चैरयं
चो नरपदाधिकारस्य वहिरङ्ग-स्यनासिद्धत्व बोधिके तीचपकाचोरिति सूत्रे भाष्ये सर्वपदस्थकिरितिसानादर्तव्या
परन्त पश्चादावन्तस्थारेनासिद्धत्वं मृगमः त्रिपाद्यान्तरप्रवृत्तेर्न मतेपि यथादेशापक्षाश्रयणेनान्यथासि। १८

ह्वोदाहरणदानेन तदुक्तिर्नमावश्यकमित्याहुः आभीयत्वं रोपेआभीयस्य बहिरङ्गस्य समानाश्रयस्य
नानेनासिद्धत्वमसिद्धत्वमसिद्धत्वादित्यसिद्धवत्सूत्रे भाष्ये स्पष्टम् एवं सिचिवृद्धेर्येन नाप्राप्तिन्यायेन अन्त
रङ्गबाधकत्वमत्र लक्ष्ये न सिध्यति बहिरङ्गमस्तीति इकोऽसवर्णे इति सूत्रे भाष्ये स्पष्टम् ५४ तन्वेवमन्तरङ्गे इत्यादेर्वहि
रङ्गस्यादेरसिद्धत्वादन्तरङ्गे यणा न स्यादत आह ॥ नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ अत्र यत्र तत्कोऽसिद्ध इति सू
त्रस्थं तत्कृग्रहणं ज्ञापकम् अन्यथा ऽधीत्य प्रेत्येत्यादौ समासान्तरङ्गस्य ग्रहणात् शर्वसमासे जाते तत्र संहिता
या नित्यत्वात् ल्यबुत्पत्ति पर्यन्तमप्यसंहितायामवस्थानासम्भवेनैकादेशो ल्यपि तुगपेक्षया पदद्वयसम्बन्धि
वर्णद्वयापेक्षत्वेनैकादेशस्य बहिरङ्गतया ऽसिद्धत्वेन तद्वैयर्थ्यं स्पष्टमेव पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वे बहिरङ्गमि
ति प्रकृत्यादौ गुणो बहिरङ्ग इति य्येन नधातुलोप इति सूत्रे संयोगान्तस्य लोप इति सूत्रे च भाष्ये स्पष्टम् यत्तु यत्र ग्रह
णमपि ज्ञापकम् अन्यथा ऽकासीद् इत्यादौ पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन बहिरङ्गस्यैकादेशस्यासिद्धत्वे।
न षत्वा हते ज्ञोकिन्ने ने ति तत्र इणः षूर्वपदसम्बन्धित्वेनाप्यतस्यापि पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन उभयोः
समत्वात् एकादेशस्य परादिवत्वेन आसिचदित्यस्य पदत्वेन पदादित्वाभावात्सात्पदाद्योरित्यनेन निषेधः
नैयादिकेन्तरङ्गे कार्यकालपक्षे बहिरङ्ग परिभाषाया अप्रवृत्तेः सर्वमुपपादितत्वाच्च परिभाषार्थ्यस्य अस्येव।

स्यानन्तर्यनिमित्तकं तत्रैकार्ये जातस्य वहिरङ्ग॰ स्य वहिष्ट्वं प्रकृतिभिन्ने वहिः पदेन वहिरंगं तस्य भावो वहिरं
गत्वं तत्र प्रकृतासिद्धस्य न प्रकृतिभिन्नेप्राप्तिरिति असिद्धं वहिरङ्ग॰ मित्युक्तानाज्जानन्तर्य इति वक्ष्यामीति भाष्या
प॰ न्यात अत्र नस्यान्तरङ्ग॰ इत्यस्यानुवृत्तिसूचनात् तेन पञ्चावेदमित्यादौ न दोषः अन्तरङ्ग॰ स्याचस्यानिककार्ये
२१ ऽपि तस्यान्यानन्तर्यनिमित्तकत्वाभावात् जातस्य वहिरङ्ग॰ स्यासुक्ताः पञ्चेश्चधियतीत्यादौ वहिरङ्ग॰ दीर्घगुणा
21 देरसिद्धत्वे सिद्धम् अत एव वृद्धि॰ शीनामाङ्गुणाः सवर्णदीर्घत्वाच्छत्वे च नस्यान्तरङ्ग॰ लक्षणानादिसङ्ग॰ कृते ।
अत एवैमाङ्ङोश्चेत्यादि॰ ग्रहणं चरितार्थम् तद्धि शिवश्याश्रीतिसिध्यति परमपि सवर्णदीर्घं वाधित्वा धात्वप
संगकार्यत्वेनान्तरंगत्वादाङ्गुणो हि दिवा पुनार्थम् न चात्त्वसूरित्यत्र यणि कृते रुढो सिद्धत्वाद्धलि लोपाप
त्तिरिति वाच्यम् अचोन्यानन्तर्यनिमित्तकेन्तरङ्ग॰ कर्त्तव्ये कृते च तस्मिन्यदन्तरङ्ग॰ प्राप्नोति तत्र च कर्तव्ये
नासिद्धत्वमिति तदर्थात् असिद्धपरिभाषाया अनित्यत्वेन तद्वारणे तस्यावैयर्थ्यं तेनैव सिद्धेः अत एव न लोपः ।
सुविति सूत्रे कृते तक्कुग्रहणं चरितार्थम् अन्यथाहन्तहृष्वामित्यादौ वहिर्भूतस्यां निमित्तक पदत्वास्यापवे
न वहिरंगतया न लोपासिद्धत्वेन सिद्धत्वेन तद्वैयर्थ्यं स्पष्टमेव मम तत्तत्किञ्च जानन्तर्यसत्त्वान्न दोषः नचैवंस २१
ति हृस्वस्यपि तीति सूत्रस्य भाष्यविरोधः तत्र हि यामणिपञ्चत्यत्रेकोस्सोप्तत इति सूत्रे कृते तत्क माशंक्य हृस्व

स्य बहिरंगासिद्धत्वेन समासाहितेनात्वानन्तर्यस्यास्य सत्वे तत्र तत्र प्रवृत्तेरसंगतिः स्पष्टैवेति वाच्यम् तेन भा
ष्याणामनावश्यकत्वबोधनात् तत्ज्ञापकेनान्तरंगपरिभाषाया अनित्यत्वबोधनस्यैव न्याय्यत्वात् ।
अत एवाचः परस्मिन्निति सूत्रे भाष्ये पटुव्या इत्यत्र यणादेशस्यानपायः सिद्धत्वात्पूर्वयणादेशः साधितः अ
त एवैषा भाष्ये पुनः क्वापि नोल्लिखिता अत एवान्तरङ्ग परिभाषाज्ञापकस्य विप्रतिषेध सूत्रे ऽस्यावरू निप्र
योजनानि सन्तितदर्थमेषा परिभाषा कर्त्तव्या प्रतिविधेयं दोषं ष्वि स्तक्तं संप्रसारणाच्चेति सूत्रे भाष्ये प्रति
विधानं च परिभाषाविषये ऽनित्यत्वाश्रयणमेवेति ध्वनितमित्यलम् नन्वेवं गोमन्नित्यत्रादौ पदद्वयवति
मित्तकसमासाश्रितत्वेन बहिरंगो लुकं बाधित्वान्तरंगत्वाद्धल्ङ्यादिलोपेन मादयं स्यादत आह ॥ अन्तरंगा
नपि विधीन्बहिरंगो लुग्बाधते ॥ अत्र च प्रत्ययोत्तरपदयोश्चेति सूत्रं ज्ञापकम् त्वत्कृतमित्यादौ लुगपेक्षया।
तरङ्गत्वाद्विभक्तिनिमित्तकत्वेन त्वमावेकवचने इत्यनेन सिद्धे इदं व्यर्थं सज्ज्ञापकम् ननु तवपुत्रस्त्वत्पुत्र इत्या।
दौ त्वममादिबाधनार्थं तदावश्यकमिति चेदेवं तर्हि अत्र त्यमपर्यन्तग्रहणानुवृत्तिस्तज्ज्ञापिकेति भाष्य
तः युष्मदादिभ्य आचारक्विब्वृत्तेन संसृष्टौ सूत्रस्य ज्ञापकतापरभाष्यप्रामाण्यात् ह्रस्वनद्यापइतिनुड्वि
धायकसूत्रस्य भाष्यप्रामाण्येन हलन्तेभ्य आचारक्विबभावाच्च एवमेवैकाज्ज्ञापकताशैथिल्येन भाष्यस्ये

कदेशश्रुतित्वात्प्रकारान्तरेणाक्षिपं वारयति कृत्तेतिर्थकाभ्यां प्रातिपदिकप्रकृतिकणिचोप्यनभिधानं वोध्यम्
पतेनक्षिपितत्वादेशार्थं प्रत्ययग्रहणांचरितार्थमित्यपास्तम् ननु मपर्यन्तानुवृत्तिरपि सर्वादेशत्ववारणाय च
प॰ रितार्थानेवोत्सर्गसमानदेशाअपवादाइतिन्यायेनासिद्धवन्नत्र भाष्यसंमतेन मपर्यन्तस्यैवादेशे सिद्धे तदनुवृ
२२ त्तिर्व्यर्थेति वाच्यम् तस्य अमकजादौ व्यभिचारादिति चेन्न अभिमितत्वेन बहुचिपुरस्तात्तुग्रहणेनाकचि प्राक्कदे
22 ग्रहणेन तस्य वाधेप्यत्रोत्सर्गस्यत्यागेप्रमाणाभावात् अतएव तस्मिन्नणि चेत्यनेन युष्माकायादेशविधानं चरि
तार्थम् अन्यथाआकडुनदेशमेवविदध्यात् आकमि तवकायादेशयोरेतदपवादयोःकृत्स्नन्यायेनान्त्यादे
शत्वापत्तिरतस्तद्विधानमिदमेव च तज्ज्ञापकम् यद्यपि विरोधे वाधकत्वमिति वार्तिकमते यंन्यायः भाष्य
कारस्तु विनापि विरोधं सत्यपि सम्भवे वाधकत्वमिच्छतीत्यनभिहितमस्ति कैयटरीत्यानार्थनियमस्तथापि यु
ष्माकायादेशविधानज्ञापित उत्सर्गः स्वाक्रियत एवेति प्रकृतेनदोषः एतद्भाष्यमपितद्रीकारेमानं एवं
च मपर्यन्तानुवृत्तिस्त्वत्कृतमित्यादौ मपर्यन्तस्य विधानार्थात्र चान्तरङ्गः तानमावित्येव सिद्धे अयोसाप
तत्ज्ञापिकाज्ञापितेनत्वस्मिन्नेतद्विषये तवादीनामप्राप्त्यातदपवादत्वाभावेन मपर्यन्तस्यैवादेशार्थस्याचरि २२
तार्थैतितदाशयः यत्तु हरदत्तेनान्तरङ्गः प्रवृत्तौ प्रत्यये उत्तरपदे च मपर्यन्तासम्भवेन तदनुवृत्तिर्व्यर्था

सतीतन्नापि केश्चिदुक्तम् तत्र अन्तरङ्गाणामप्यपवादबाध्यत्वेन तद्विषयेनदप्रवृत्तेः वस्तुतस्त्विदं ज्ञापकं वा।
निकरीत्येव भाष्यरीत्यातु वाचनिकमेवायमर्थ इत्याहुः इयं सप्तम्यौ आविति लुग्विषये वेति केचित् एतद्रू
पात्सम्बुद्धेर्न पासयो रित्यादि सूत्रस्याकरणमाश्रयेन लुग्मात्र विषया आधेहे ऽत्र इत्यादौ अनेन न्यायेन लो
पं बाधित्वा लुग्भवतीति भाष्ये उक्तम् अन्येन त्वन्तरङ्गांश्च विधीन्सर्वापि लुग्बाधते तेन सुपः लुगेवात एव सती
सं सर इत्यादौ न लोपो न भवति यच्चभिः खट्वाभिः क्रीतः पञ्चखट्व इत्यादावेकादेशात्प्रागेव टापो लुक् अ
न्यथा कृते एकादेशे लुकि अकारश्रवणं न स्यादिति केचिदेवोक्तम् एतद्धि रोपात् यत्नराजस्येति सूत्रे कैय
टेनोक्तम् अङ्गानि तिङ्क्षा तो ऽन्यपरत्वस्य पोलुकि बहुवचनपरत्वाभावात् राजस्येति लुग्न स्यादिति शंका।
परभाष्यव्याख्यावसरे अन्तरङ्गानपीति न्यायेनापञ्चकस्य इत्लुको बाधकः स्यादित्याशङ्कास्य इत्लुकोपवादे
नैव बलवत्त्वेबाध्यत इति तत्रैव हेति द्रष्टव्यं लुगपेक्षया लुको बलवत्त्वस्यवक्तुमशक्यत्वादिति तदाशङ्कास
माधानेवकैपुक्तम् अनेन न्यायेनान्तरङ्ग निमित्तविनाशकलुक स्त्वप्रयोजकत्वमासादीनां च प्राबल्ये वा
ध्यत इत्यस्य विस्तरः ५८ नन्वेवं सोमेदृत्तरङ्गत्वादाड्गुणेः पूर्वपदात्परो नृत्य शब्दाभावेन नेन्द्रस्य परस्येति ह
द्धि निषेधो व्यर्थः अन्तादिवद्भावस्तु भपतन्या अप्राप्तो निषिद्धः किंच हहिरण्यत्र प्राप्नोति अन्तादिवत्त्वाभ

याभावेपिपूर्वान्तवत्वेनैकादेशविशिष्टस्यपूर्वपदत्वेनन्द्रशाहस्यैकदेशविकृतन्यायेनोभयतआश्रयणेनांता
दिवदितिनिषेधाभावेनतदाश्रयेणचोत्तरपदत्वेपितस्याननुकृत्वात् एकस्यैकादेशेनपरस्यनिमित्तेनयस्ये
तिलोपेनापहाभात् नचयणादिवद्भावेनैकादेशविशिष्टस्योत्तरपदत्वमेवास्त्विति नसंभवतीतिवाच्यम् उत्तर
प॰ पदाधिकृतस्थानिकत्वानुकृतेस्तद्भावेनाप्राप्तेः ताद्रूप्यानतिदेशात् अन्यथाखट्वाभिधिन्यादावपिपूर्वान्तवत्वे
२३ नभिस्येस्यापत्तिरितिभाष्येस्पष्टम् अतएवपूर्वैषुकामशमादावन्तरङ्गत्वात्सवर्णदीर्घस्यादित्याशं
23 कितंतदेकदेशमात्रस्यविकाराभावाच्च तदुक्तंभाष्ये इन्द्रेद्रावप्येकादेशस्येतिलोपेनापहृतः परएकादे
शेनततोऽनत्कुकरन्द्रः सएवमस्तयकः प्रसंगोहाइहेतिमहदादिभिरिन्द्रस्यहन्द्रइन्द्रस्येवपूर्वनिपातोऽतआह
॥ पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोप्येकादेशोन ॥ अत्रचनेन्द्रस्येतिनिषेधएवज्ञापकस्तन्तादिव
द्विप्रतिषेधेपरमितिसूत्रेभाष्येस्पष्टम् ५९ नन्वेवमपिप्रधायप्रस्थायेत्यादावन्तरङ्ग॰त्वाद्दीर्घाद्दि
त्वप्रस्यादित्यतआह ॥ अन्तरङ्गानपिविधीन्बहिरङ्गोल्यब्बाधते ॥ अदोजग्धिर्ल्यप्तिकितीत्येव
सिद्धेल्यब्ग्रहणमस्याज्ञापकमित्यदोजग्धिरित्यत्रभाष्येस्पष्टम् ५९ नन्वेवमियायेत्यादौहित्वकृतेन्तरङ्ग॰ २३
त्वात्सवर्णदीर्घत्वेनदस्थितिरत्तआह ॥ वार्णादाङ्गंबलीयोभवति ॥ तेनान्तरङ्गमपिसवर्णदीर्घंवापि

त्वाद्ध्रस्वविधिरिति तत्सिद्धिः अभ्यासस्यासवर्णे इति यङ्‌बाधकसूत्रस्य असवर्णग्रहणमस्याज्ञापकम् यद्वी
यत्तरित्यादावियङ्‌ स्यादेतदर्थमेतत्परिभाषाभावे ईयत्तरित्यादावन्तरंगेण सवर्णदीर्घेण बाधात् तदर्थं इय
ङ्‌ बङोर्हि अभ्याससम्बन्धनिमित्तकत्वाद्बहिरंगौ नचेयङ्‌ पवादः येन नाप्राप्तिन्यायेन नेयतीत्यादिसक
लल्लक्ष्यप्राप्तयणपवादत्वस्यैव निर्णयादिति प्राचः परे तु एतत्परिभाषाभावे अभ्यासस्येति सूत्रमेव व्यर्थं
नचेयेष इयायेत्यादौ चरितार्थं तत् योरपि पूर्वप्रवृत्तगुणस्य पूर्वप्रवृत्तहलादेशाद्द्विर्वचने चीतिरूपातिदेशेनापहा
रेद्धिनेकृते पुनः प्राप्तगुणाद्धीवाधितत्वान्तरङ्गत्वात्सवर्णदीर्घापत्तेः नचेयर्तीत्यादौ तच्चरितार्थम् ताव
न्मात्रप्रयोजनकत्वे उवित्येव ब्रूयात् योरिमन्नु वर्तते इणो यणिति साहचर्येणाख्यानात् अधातोरेव
ग्रहणं अर्त्तेरिवर्णस्य यङ्‌ स्यर्थः अभ्यासस्यान्तौ वितिअभ्यासस्यार्तेरिति वा गुरुत्वात्तत्र पक्षे नच एऐश्रो
श्रो शह्नभ्यश्च आचारक्विवन्तेभ्यो लिटीयङ्‌ न्यायर्थं तत्सूत्रमावश्यकम् तथा श्रोणयतेर्णिलुक्त्वादिकार्ये क्व
जन्तात्सनि उवोणकीयिषतीत्याद्यर्थमावश्यकमिति वाच्यम् बाह्यप्रयमाक्विकान्तस्य भाष्यप्रामाण्ये
नतेषामनभिधानादत्यहितीयद्विर्वचनस्यैव सत्वेन तद्वक्तप्रयोगस्यैव दुर्लभत्वात् एवंच संपूर्णसूत्र
स्यैवज्ञापकता युक्ता यद्यपि भाष्ये यदयमभ्यासस्यासवर्णे इत्यसवर्णग्रहणं करोतीति ग्रंथेन असवर्ण।

ग्रहणस्यैव ज्ञापकता लभ्यते तथापि न ह्रस्वान्ते गुणवृद्धी असवर्णाग्रहे ऽभ्यासो भवतीति तदुपपादनग्रंथेन
संवर्णसूत्रस्यैव ज्ञापकता लभ्यते अग्रेपि नैतदस्तिज्ञापकमतएव तस्मादित्यनेन सूत्रसार्थक्यमेव दर्शि
प॰ तम् असवर्णग्रहणस्य ज्ञापकत्वेन तथावसंप्रदर्शनेन तत्सार्थक्यमेव दर्शितं स्यात् नचाकृतव्यूहपरिभा
२४ षयेयायेत्यादौ सवर्णदीर्घाप्राप्तिर्यद्दीर्घो न स्यात्तर्हि गुणः स्यादिति सम्भावनायाः सत्त्वेन परिभाषाप्रवृ
24 त्तेः रूपपादकत्वादिति कथं सवर्णसूत्रस्य ज्ञापकतेति वाच्यम् तस्यासमत्वात् स्वैवापत्तेर्ज्ञाप्यमामाण्येन
यथान्तरङ्गकार्यप्रवृत्तियोग्यकाले तत्रैव तन्निमित्तविनाशकबहिरङ्गविधेः प्राप्तिस्तत्रैव तत्परिभाषा
प्रवृत्तिस्वीकाराच्च नचान्तरङ्गत्वाद्दीर्घे पीयायेत्यादौ सवर्णदीर्घैकत्वेनाभ्यासत्वादिवर्णनाश्रुणत्वस्य सवर्ण
इयङ्विधानेन सूत्रं चरितार्थम् नचाविक्रृत्वेनेन सिद्धिः वृद्धिबाधनार्थत्वादिति वाच्यम् प्रत्यासत्त्या॰।
सवर्णपदेनाभ्यासोत्तरावर्णऽसम्बन्ध्यासवर्णत्वपदग्रहणात् शास्त्रबाधकल्पनापेक्षया परिभाषाज्ञाप
कत्वस्यैवौचित्याच्च साचेयं यथर्भिग्राहकमानादङ्गवर्णयोः समानकालिकत्वेपि यत्र समाननिमित्तक
त्वरूपसमानाश्रयत्वेप्येवैषेति तत्र ज्ञापितेपीयायेत्यादिसिद्धेः सूत्रवैयर्थ्यस्य तदवस्थत्वाच्च येनानरूप २४
त्रत्वस्य समानकालीनत्वाश्रयस्य अनित्यत्वाद्भाष्ये गुणान्तरङ्गत्वाद्यणादेशः एतेन चाङ्गत्वाल्लघूपधगुणः स्या

दित्यपास्तं नचैवमपीपायेत्यादाविपट्‌ दुर्लभस्तत्रकर्तव्ये हूयादेः स्थानिवत्वेनासवर्णेइतिप्रतिषेधादिति
वाच्यम्‌ सूत्रारम्भसामर्थ्यादेवस्थानिवत्वाप्रवृत्तेः नचसामान्यापेक्षमभ्यासस्यकार्यंतडजरावणादेश
स्यतत्कार्यप्रतिबन्धकीभूतं स्थानिवत्वेनेति अतएवारतीत्यादौ यणादेशस्यस्थानिवत्वादभ्यासस्यउ
लोपइतिदीर्घोदुर्लभः इत्यपास्तं दीर्घविधौतन्निषेधाच्च अरि प्रियादित्यत्रस्थानिवत्वेनेयङ्‌ भवत्येवत
स्यस्थानिवत्वस्याभ्यासकार्यप्रतिबन्धकत्वाभावात्‌ इयंचांगसम्बंधिन्यांगएवेति स्वदिनोवेति सूत्रेभा
ष्येतत्रहि क्रमार्येइत्यादौयणान्तरमाहुः इयंचानित्याच्छ्वादितिसतकानिर्देशात्‌ अन्यथांगत्वात्पूर्वत्वेना
शादेशेनकाशप्नातहेयर्थीस्पष्टमेवेत्यन्यत्रविस्तरः ५५ नन्वेवंसेदुषइत्यादौक्वसोरन्तरंगत्वादिटितत
संप्रसारणइटः श्रवणापत्तिरितिचेदत्रकेचित्‌ अकृतव्यूहाः पाणिनीयाः नकृतोविशिष्टकृद्योनिश्चयः शास्त्र
प्रवृत्तिविषयोयेषामित्यर्थः भाविनिमित्तविनाशइत्यर्थापत्तिः बहिरंगेणान्तरंगस्यनिमित्तविनाशेपश्यान्तरं
भाविनेंतरङ्गं नेतियावत्‌ अत्रचज्ञापकं समर्थानांप्रथमाद्वेति सूत्रेसमर्थानामितितद्धिसत्यिताद्धिमधूक
नदीर्घेभ्यः प्रत्ययोत्पत्त्यर्थम्‌ अन्यथांतरंगत्वाद्दीर्घेकृतएवप्रत्ययप्राप्त्यातद्व्यर्थतास्पष्टैव तत्रहिभाविन्यादि
वृद्ध्यासवर्णदीर्घविनाशः स्पष्टएव नचात्रैकादेशप्रवृत्तिसमयेहद्यप्राप्त्यैकादेशेकृतेआदेशहेतुःभाभाव।

पि तन्निमित्तविनाशाभाव इति वाच्यम् तद्द्वारैव निमित्तविनाशत्वेनाततेः नच सोऽस्यितो वहिरंगतया
वृद्धेरसिद्धत्वान्न तन्निमित्तविनाश इति वाच्यम् समर्थग्रहणेनैतद्विषये तस्याप्रवृत्तेरपि ज्ञापनात् यत्तु स
मर्थग्रहणेनान्तरंगपरिभाषाया अनित्यत्वमेव ज्ञाप्यत इति तन्न असिद्धपरिभाषया समकालप्राप्तवहिरं
प० गस्य पूर्वं जातवहिरंगस्य चान्तरंगे कर्तव्ये असिद्धत्वं वोध्यते न तु जाते न रंगे तस्य तत्त्वं बोध्यते मानाभावात्फला
२५ भावाच्च एवं च स्थितावेकादेशस्य परिभाषासाध्यत्वाभावेन न तदनित्यत्वज्ञापनासम्भवात् अन्तरंगानपि
25 विधीन्निमित्तादेरस्यसामेवान्तर्भावः एतत्प्रवृत्तौ च निमित्तविनाशसम्भावनापि निमित्तम् अत एव गोमदंड्री
त्यादौ हलङ्याब्दिलोपेन अन्यथा हलङ्याब्दिलोपकाले सामासिकलुकः प्राप्त्या तदुत्तरं चाग्रहायां भावा
दप्राप्त्या लोपस्यैवापत्तेः अस्ति चात्रापि सम्भावना यदि लोपो न स्यान्नर्हि लुक्स्यादेवेति अल्लोपो न इति सूत्रस्य
तपरकरणाद्बपरिभाषाया अनित्यत्वज्ञापनेन चरितार्थे तद्धि आनरत्यादौ लोपवारणाय अन्यथा दीर्घाभावे
लोपसंभावनयैतत्परिभाषावलाद्दीर्घाप्राप्तौ न ह्येयष्ठ्यौ स्पष्टमेवत्याऊः समर्थानामिति सूत्रे केयटस्तु।
समर्थवचनेनेयं परिभाषा ज्ञाप्यते अकृतव्यूहाः पाणिनीया इति तेन पपुषः इत्यादावन्तरंगत्वात्पूर्वं कृते २५
पीडागमो निवर्तत इति वदन् न कृते व्यूहो विशिष्टस्तर्कः निमित्तकारणनाशेपि कार्यस्य स्थितिरूपो येरितस्थ

मभिप्रैति· निमित्तापाये नैमित्तिकस्याप्यपायः इति यावत् सू॰ स्थितादि जिह्वे दोदीर्घेति हत्वौ सावुत्स्थितिर्मा
भूदिति समर्थानामिति लोकन्यायसिद्धस्यायमर्थस्तथाहि लोके निमित्तं द्विविधं दृष्टं कार्यस्य स्थितौ नि
यामकं तदनियामकं च आद्यं यथा न्यायनयेऽपेक्षाबुद्धिस्तन्नाशेन द्वित्वनाशाभ्युपगमात् वेदान्तिनये प्रा
रब्धस्य विक्षेपस्य स्थितिनियामकत्वं प्रसिद्धमेव द्वितीयं यथा दण्डादि तन्नाशेऽपि चिरं नाशादर्शनाद्ब्रह्मसेल
स्यानुरोधात् स्वभावविनिमित्तविनाशे एवं मनुष्यनौ तन्न कश्चिन्न्यायो नापि संप्रतिपत्त्यै ऽरदृष्टान्तः सम
र्थानामित्यस्यापि लोकसिद्धार्थज्ञापनेन वा [illegible] मभवे लोकासिद्धापूर्वनादृशार्थज्ञापकत्वमाना
भाव इति तदाशयः इति बोध्यम् पर[illegible]स्मादोपदाभावपि के व्याख्याने सद्धम् असिति स्थिते रहसंप्र
सारणयोः प्राप्तौ प्रतिपदविधित्वात्पूर्वं संप्रसारणे बलादित्वाभावादिटः प्राप्तिरेव नेति तत्सिद्धिरिति स्पष्टं
समर्थानामिति सूत्रे कैयटे असिद्धवत्सूत्रे कैयटे च स्पष्टमेतत् यद्यपि प्रतिपदविधित्वमनवकाशत्वे सत्ये
व बाधकत्वे बीजं तथापि पूर्वं प्रवृत्तौ सावकाशत्वेऽपि नियामकं भवत्येवेति तदाशयः निरूपितं चैतद्बृहच्छ
ब्देन्दुशेखरे समर्थानामिति सूत्रस्य समर्थग्रहणान्तविभागात् सावकृतमन्तोः प्रत्ययदर्शनेन सर्वत्र तथा
भ्रमवारणाय न्यायसिद्धार्थानुवादत्वमेवं स्वमितं चेदं विप्रतिषेधसूत्रे भाष्ये तत्र हि वैदमाणिरित्यत्र रङ्कु· परि

भाषोदाहरणमुक्तम् किंच विभज्यान्वाख्याने सुउत्थित अहरहः इति स्थिते वा णिदां गो बलीय इति प्राप्तमहद्वि
वारणाय समर्थग्रहणमित्यत्रैव सूत्रे एकैकपदे स्पष्टं अत एवासिद्धवदत्रेत्येव सूत्रे संप्रसारणमन्वियोः सिद्धं वक्त
व्यपगृह्य इत्यादौ वेशाः संप्रसारणे कृते आतो लोपो यथा स्यादिति भाष्ये उक्तं पदस्य विभज्यान्वाख्याने हरे वी
कैकपदस्थत्वात् पूर्वं संप्रसारणात् इटो आप्यात्वल्लिमित्तक एवातो लोप इति तदाशयः अन्यथान्तरङ्गत्वादिति
प॰ २९ तन्निमित्तक एवातो लोप इति तदसंगतिः अत एव चौ प्रत्यङ्गस्य प्रतिषेधवचनं वार्तिककृता रब्धं भाष्यकृ
28 ता च न प्रत्याख्यातम् प्रत्यङ्गमन्तरङ्गम् अस्यां परिभाषायां सत्यां तद्वैयर्थ्यं स्पष्टमेव अत एव ढ्लोपे इति सूत्रे
ऽवश्यमत्र तग्रभावार्थीयत्नः कार्यो अन्तरङ्गत्वादित्व प्राप्नोतीति भाष्ये उक्तमेतत्सर्वं तत्कोः प्राप्त्यायत्नावश्य
कत्वकथनमसङ्गतमिति स्पष्टमेव न चैतन्नित्यत्वज्ञापनार्थमेतदिति तदाशयः अवश्यमत्रेत्यदन्तरस्थार्
स्य भङ्गापत्तेः किंचानयैव प्रत्ययोत्तरपदयोश्चादौ जग्धि त्व वित्यत्र पोश्चादि ताथ्यं न तज्ज्ञापकवशाल्लुको
ल्यपश्चान्तरङ्गं बाधकता भाष्योक्ता भज्येत किंचैषा भाष्ये न दृश्यते तदुक्तम् असिद्धवदत्रैकैकपदे न निमित्ता
भावे नैमित्तिकस्याप्यभाव इति परिभाषया भाष्यकृता नाश्रयं दिति पदसंस्कारपक्षे हरिरित्यादौ विस २९
र्गादौ कृते ततो गच्छतीत्यादि संबन्धे हरी गच्छतीत्याद्येव साधुः तद्विषये पदसंस्कारपक्षानाश्रयणं चेति
॥ ॥

रिक्त ५९ अन्तरंगादप्यपवादो बलवान्तत्रापवादपदार्थमाह ॥ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बा
धको भवति ॥ प्राप्त इति भावे क्तः येन नाप्राप्त इत्यस्य यत्कर्तृकावश्यप्राप्तावित्यर्थः नञ्द्वयस्य प्रकृ
तार्थदार्ढ्यबोधकत्वात् एवं च विशेषशास्त्राद्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यक
शास्त्रस्य विशेषशास्त्रेण बाधः तत्प्राप्तियोग्येऽचरितार्थत्वं हि एतस्य बाधकत्वे बीजं किं चानेन न्यायेन
तन्महत्स्वन्तरं चारितार्थ्येऽपि बाधबोधनम् अन्यथानवकाशत्वेनैव बाधे सिद्धे एतत्कथनवैयर्थ्यापत्तेः ।
तक्रकौण्डिन्यन्यायप्रदर्शनवैयर्थ्यापत्तेश्च यथा प्रथमद्विर्वचनस्य तनुजरं ह्यनवकाशेनापि द्वितीयद्विर्वच
नेन बाधः यथा वाऽऽदेरपि प्रवृत्त्या चरितार्थेनादेः परस्येत्यनेनालोन्त्यस्येत्यस्य बाधः तदुक्तं सिद्धे चोत्स
र्गे भाष्ये सत्यपि सम्भवे बाधनं भवतीति अन्यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र तक्रदा
नेन दधिदानस्य बाधो न स्यात् तदानीन्तरं तत्पूर्वं वा तद्दानस्य चारितार्थ्यसम्भवात् अत एव विषयभेदेऽप्य
पवादत्वे अत एवाचिरादेशेन तृटोऽप्यपवादत्वाद्बाधमाशङ्क्यत इति सिद्धमिति स्थापकेन समाहितं तत्र च तत्सूत्रे भा
ष्येणेन निषेधेन विषयभेदेऽपवादत्वाभाव एव बोधित इति कश्चित्तन्न वित्सनेताल्लुकादिलोपमात्रबाधानाप
त्तेः यत्तु दयतेर्दिगि लिटि सूत्रे हि द्वित्वात्तरं दिग्यादेशस्य चारितार्थ्येऽपि पदेनोक्तं तत्प्राप्त्याधनितं वेनानापितया

त्वं तस्य तदुत्तरग्रंथेन असम्भवे एव बाधकत्वे विरोधस्य तद्दीजत्वादिति वार्त्तिकमतं तु भाष्यकृता दूषितं तथा
त्वलस्य सिज्वृद्ध्युपयोगितया ककैकाडित्वस्याप्रयोपि तत्प्राप्तियोग्येष्व चरितार्थविषयो विधेयविषय एव चेति तद्धि
तेष्वचामादेर्धातोरेकाच इत्यादिसूत्रेषु भाष्ये स्पष्टम् क्वचित्तु सर्वथा अनवकाशत्वादेव बाधकत्वं यथा उदः स्था
म्भोयाडादिबाधकत्वं न हि याडादिकृते पुडुः शाम्प्राप्नोतीति निर्दिश्यमानस्याबधानात् तत्र स्वस्य रूपं
प्रवृत्तिरित्येव तत्रैव बाधः तत्र बाधके प्रवृत्ते पश्चादुत्सर्गप्राप्तिरस्ति न वा भवत्येव सः यथा तत्रैव याडाद
यः अप्राप्तौ तु न यथा पचेयुरित्यादौ दीर्घबाधके निरवकाश इयादेशे दीर्घाभावः तदेतत्सर्वमुक्तं क्वचि
दपवादविषयेप्युत्सर्गोभिनिविशन्त इति अपवादशब्दोत्र बाधकपरः तदुक्तं गुणो यङ्लुकोरित्यत्र
भाष्ये अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते अजीगणत् अत्र गणेरीत्वमपवादत्वात् हलादिः शेषं
न बाधते किं तर्ह्यनवकाशत्वाद्धि तिङ्ग्रंथेन गणेरूपाभ्यासं त्वणेस्यत्वमित्यर्थः हलादिः शेषेण तत्रि ह
तौ तदनवकाशत्वं इत्वे तु कृते तस्य प्राप्तिरंत्यहलोभावात् अभ्यासविकारेषु बाध्यबाधकभावाभा
वेन स्थापितम् तस्मिंश्च सति लोपे सामर्थ्याद्धि कृष्टस्यान्त्यस्यैत्वमिति न दोषः न च येन प्राप्तिन्यायेनापवा
दत्वमप्यस्य चचेतस्य चरितार्थविषयताया उक्तत्वात् इको फलि ति सूत्रे भाष्ये ध्वनितमेतत् तत्र हि य्

पु० २२

क्तेनेति दीर्घेणाद्गुणोत्तरं फलाभावेनानवकाशत्वाद्गुणो बाधितेदीर्घोत्तरं गुणः स्यात् दीर्घविधानं त्वस्मि।
न्नोतेंदीर्घे कृते सति मीमेत्यत्र ग्रहणे न ग्रहणोऽयं वतत्र पक्षान्तरमयणाबाधनार्थमिकोऽकलितिकित्वमित्युक्तं
अन्यथापवादत्वेन बाधेतद्विषये उत्सर्गाप्रवृत्तेर्भाष्यस्य सूत्रस्य चासंगतिरिति स्पष्टमेव यत्तु काचनीत्या
दत्वपवादस्य यद्विषये प्रमाणाभवति क्वचिदपवादविषयेपीति न्यायादिति तत्र प्रमाकर्मणि चेति सूत्रस्य भा
ष्यविरोधात् तत्र सूत्रणः पुनर्वचनमपवादविषयेप्यनिवृत्त्यर्थम् गोदायोः न्नजातीन्यायुक्तम् कांचनीत्या
द्वेकांचनेन निर्मितेत्यर्थे शैषिकोऽणबाध्यः अयंदबाध्यं येन नाप्राप्ते इत्यत्र येनेत्यस्य परिसेनतेरेणोत्यर्थः न
दास्तविषयेसेनतरयत्प्राप्नोतीति तद्बाध्यम् विधंतराप्राप्तविषयाभावात् इयमेव बाध्यसामान्यचिंतेति
अवच्छिद्यते अनवकाशत्वेन बाध्येष्वपवादकेशकायामुदाहरणमस्ति विनिगमनाविरहात् यदितयेन।
त्वस्ययेनलक्षणेनेत्यर्थो येनकार्येणेत्यर्थोवा तदा बाध्यविशेषचिन्ता अनवकाशत्वेन बाध्येपि यत्तद्बाधे
नप्राप्त्यर्थवत्त्वतन्तद्बाधेनेत्येवं विशेषचिंतासम्भवः यद्युदाहरणमस्ति ५० तत्र येन कार्येणेत्यर्थे पररूप
त्वावच्छिन्ने कार्ये प्राप्ते आरभ्यमाणा या वृद्धिस्तद्बाधकत्वे निर्णीते किं शास्त्रविहितस्यैवं तद्विशेषचिंताया
माह ॥ पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान् ॥ अवश्यं पूर्वपरस्मिन्बाधनीये प्रथमोपस्थि

नानंतरवाधेन चारितार्थ्यपक्षाउपस्थितस्मात् ततः पक्षस्य बाध्यमानाभावः आकांक्षानिवृत्तेः विप्रतिषेधशास्त्र
वाध्यमानाभावाच्चेति तस्य बीजम् ५८ नासिकोदरौष्ठजंघादन्तकर्णशृंगेभ्यश्चेत्यादिनिषेधस्यावच्छिन्नबाधक
प· त्वेनिर्णीते किं विहितस्येत्याकांक्षायामाह ॥ मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान् ॥ तेनौष्ठादिषु
२८ पंचस्वप्यसंयोगोपधादिति प्रतिषेध एव बाध्यते न तु सह नञ्विद्यमानलक्षणः इति नासिकोदरेत्यत्र भा
96 ष्यस्थम् पूर्वोपस्थितवाधेनैवाकांक्षाशमस्य बीजम् ५९ ननु वा छन्दसीत्यनेन सेर्ह्यपिच्चेत्यनन्तरस्या
पित्त्वस्य वदे दपि विकल्पः स्यात् यानेटीति निषेधोऽनन्तरस्येनलक्षणायां वृद्धिर्विहितस्य विषये
स्यादत उक्तन्यायमलंकमेवाह ॥ अनन्तरस्य विधिर्वा प्रतिषेधो वा अत एव संख्यायाऽव्ययादेरिति ङीप्
ग्रहणं चरितार्थम् तद्ध्यनन्तरस्य ङीषो विद्यभावाय नक्किचीति सूत्रे दीर्घग्रहणं चरितार्थम् तद्ध्यनन्तरस्या
नुदात्तोपदेशेत्यस्यैव निषेधाभावाय मध्येऽपवादादिन्यायापेक्षयाऽनन्तरस्येति न्यायः प्रबलः तस्य शुभ्य इति
सूत्रे कैयटः प्रत्यासत्तिमूलकोऽयं लक्ष्यानुरोधाच्च व्यवस्थेत्यपि पर्यवसानं तरम् तत्र तत्र क्वचित्स्वरितत्वप्रतिज्ञा
नात्सामर्थ्यान्न बाध्यतेऽयं न्यायः यथाऽऽदिर्ञिटुडव इति सूत्रेण उपाव्यवहितस्यापि विधिर्ङीपो नषडित्यादिना द्वयोर
पि टाप्ङीपोः प्रतिषेधः इयं च शिक्षासर्वनामस्थाने मित्यादौ भाष्ये स्पष्टेत्यन्यत्र विस्तरः ६० ननु दधतीत्यादा २८

वन्तरंगत्वादन्तादेशेऽल्विधौ स्थानिवत्त्वाभावाददादेशो न स्यादिति तद्वैयर्थ्यापत्तिरत आह ॥ पूर्वं ह्यप
वादा अभिनिविशन्ते पश्चादुत्सर्गाः ॥ लक्ष्यैकचक्षुष्को हि अपवादविषयं पर्यालोच्य तद्विषयत्वाभाव
निश्चये उत्सर्गेण तल्लक्ष्यं संस्करोति अन्यथा विकल्पापत्तिरित्यर्थः अभिनिविशन्ते इत्यस्य बुद्ध्यारूढा भवं
तीत्यर्थः अपवादो यद्यन्यत्र चरितार्थ इति न्यायस्य तु नात्र प्राप्तिरन्तादेशाप्राप्तिविषये चरितार्थ्याभावात्
६१ लक्ष्यैकचक्षुष्कस्तत्तच्छास्त्रपर्यालोचनं विनाप्यपवादविषयं परित्यज्योत्सर्गेण लक्ष्यं संस्करोति तस्यापि
शास्त्रप्रक्रियास्मरणे पूर्वोक्तप्रयोगे पवथमात्यते तदाह ॥ प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते ॥
तत इत्यस्यापवादशास्त्रपर्यालोचनात्पश्चादपीत्यर्थः प्रकल्प्येत्यस्य परित्यज्येत्यर्थः अत एव प्रातिपदिका
र्थसूत्रे भाष्ये इदं द्वयमप्युक्तं न कदाचित्तावदुत्सर्गो भवति अपवादं तावत्प्रतीक्षत इत्यर्थकमुक्तं ६२ एतत्सू
त्रकमेव नवीनाः पठन्ति ॥ उपजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधत इति ॥
यत्र भ्यस्तसंज्ञासूत्रे कैयटेन प्रकल्प्य चेति प्रतीकमुपादाय यथा न संप्रसारणे इति परस्य यणः पूर्वं संप्रसार
णात्पूर्वस्य यणस्तन्निमित्तः प्रतिषेध इत्युक्तं तत्र तत उत्सर्ग इत्याद्युत्तरानन्तरेण यत्रापवादवाक्यार्थविनानोत्स
र्गवाक्यार्थ इति तदर्थ इति तत्र अभिनिविशतेऽपवादविषयमित्यादिपदस्वारस्यभंगापत्तेः यदजस्यपदा

प॰ २९

ध्रौपस्थितौ वाक्यार्थबोधाभावे कारणाभावाच्च यत्रत्वपवादो निषिद्धस्तत्रापवादविषयेऽप्युत्सर्गः प्रव-
र्तत एव यथा हल्ङ्याब्भ्य इत्यत्र नादिचीति सूत्रे सवर्णनिषेधादप्रवर्तमानस्यापि वृद्धिबाधकत्वाभावाद्वृद्धिः प्रव-
र्तते अत एव नौ सदिसंगाच्छेन अत एव निर्देशाद्धश्छावसरस्यास्यात्र शास्त्रेनाश्रयणम् ध्वनितं चेदं रङ्को-
शाणेति सूत्रे भाष्यप्रदीपोद्योतेषु निरूपितम् देवदत्तस्य हन्तरि हते देवदत्तस्योन्मज्जनेनेति न्यायस्य विष-
य एव नास्ति हते देवदत्ते उन्मज्जनेन देवदत्तेन हन्तुर्नाशितस्य हन्तुर्नैव भवत्येवोन्मज्जनम् प्रकृतेऽपि न पू-
र्वसवर्णदीर्घेण हतेन नेकि न हन्तुर्नाशितस्य जातीयप्रसक्तिमात्रं प्रसक्तस्यैव निषेधात् प्रतिपदोक्तत्व-
मपि निरवकाशत्वे सत्येव बाधप्रयोजकम् शेषाद्विभाषेति सूत्रे भाष्ये स्पष्टं चेदं तत्र हि शेषग्रहणमनर्थकं
येप्रतिपदं विधीयन्ते ते बाधका भविष्यन्तीत्याशङ्क्यानवकाशा हि विधयो बाधका भवन्ति समासान्ताश्च कव-
भावे सावकाशा इत्युक्तम् क्वचिदनवकाशत्वाभावेऽपि परनित्या समवधाने शीघ्रोपस्थितिकत्वेन पू-
र्वप्रवृत्तिप्रयोजकं केवलत्वं प्रतिपदविधित्वेनापि परनित्यान्तरङ्गप्रतिपदविरोधिसन्निपाते तेषां मिथः प्रसे-
गे परवलीयस्त्वमिति प्रत्ययोत्तरपदयोश्चेति सूत्रे कैयटेन पाठात् अत एव समेरित्यादौ प्रतिपदोक्तत्वात्सर्व- २९
मेतेष्वाकारस्येषाद्धलश्चादिलोपो न प्राप्नोतीत्याशङ्क्य ऊः रुत्वादिति लोपेन समाहितम् ६३ नन्वयजे

रेद्धमित्यादावंतरंगस्यापि गुणस्यापवादेन सवर्णदीर्घेण बाधः स्यादत आह अपवादोपि यद्यन्यत्र
चरितार्थस्तर्हि अन्तरंगेण बाध्यते ॥ निरवकाशत्वरूपस्य बाधकत्वबीजस्याभावात् एवं च प्रकृतेन्त
रंगेण गुणेन सवर्णदीर्घः समानाश्रये चरितार्थो यणगुणयोरपवादोपि बाध्यते पूर्वोपस्थितनि
मित्तकत्वरूपान्तरंगविषये इदम् यत्रागमादेशयोर्न बाध्यबाधकभावो भिन्नफलत्वात् अत एव ब्राह्म
णाम्भोदधिर्दीयतां केवलः कौण्डिन्यायेत्यादौ केवलेन न दधिदानबाध इति ह्वाविति सूत्रे कैयटः तत्र अप
वादो न यदीर्घस्येति दीर्घोकित इति सूत्रस्थभाष्यविरोधात् २४ नन्वजीगणदित्यादौ णौ णेरीत्वे निरवका
शत्वाद्धलादिः शेषं बाधते तत्राह ॥ अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ॥ दीर्घोकित इत्यकिद्ग्र
हणं न्यायस्यास्य ज्ञापकम् अन्यथा पंपन्यत इत्यत्र नुकि कृते नजन्तत्वाद्दीर्घो प्राप्नोति तद्वैयर्थ्यं स्पष्टमेव इत्यप
राऽन्तरंगादिबाधकानामप्यबाधकत्वबोधिका तेनाचीकरतमीमांसत इत्यादि सिद्धम् अथेयमन्तरंगाबा
स्यपरत्वाद्दीर्घेण बाधः प्राप्नोति अतेयमान्वयेति दीर्घेणान्तरंगत्वादित्वस्य बाधः प्राप्तः यत एवैकैकग्रहस्तत
रमपि सर्वेषां प्रवृत्तिस्तत्रैवैतत्प्रवृत्तिविषयत एकहलिति सूत्रे कैयटस्तत्र तु किं कृते दीर्घाप्राप्त्याथ मिथ्याहक
मानविरोधात् मान्वयादीनां दीर्घे कृते इत्वाप्राप्त्या गुणे यङ्लुकोरिति सूत्रभाष्योक्तं तदुदाहरणासंगते

ष्येत्यन्यत्र विस्तरः ९५ ननु ताच्छीलादित्वन्विषयेष्वेवुलादिः स्यात् न च तन्न यवादः असरूपापवादस्येति
कल्पेन बाधकत्वादत आह ॥ ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ एवुलि सिद्धे निन्ददिंसादिसूत्रेण ण्वुको
प॰ ३० न्नैपावुन्विधानमत्र ज्ञापकम् तत्र एवुल्ण्वुनोः स्वरे विशेषाभावात् ताच्छीलिकेष्वपि विषयसप्तमी
तेन ताच्छीलिकैरताच्छीलिकेष्वपि वासरूपविधिर्नेति बोध्यम् नन्वेवं कम्राकमनेत्याद्यसिद्धिर्नमिकंपी
तिरेणानुदात्तेतश्च हलादेरिति युचा बाधात् इति चेन्न स्वददीपदीक्षश्चेत्यनेन दीपेर्युचो निषेधेनात्कार्यस्या
नित्यत्वात् ९६ नन्वेवं हसितं छात्रस्य हसनमित्यादौ यन्न हक्तिभोक्तमित्यत्र लिङ् लोटावीक्षणानः सोमो।
भवतार्त्यत्र ण्वुल् प्राप्नोतीत्यत आह ॥ क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ इदं च वासरूपवि।
धेरनित्यत्वात्सिद्धम् तदनित्यत्वे ज्ञापकं चार्हे कृत्यतृचश्चेति तत्र हि चकारसमुच्चेयं लिङ् कृत्यतृचोर्बाधामा
भूदिति कृत्यतृज्ग्रहणं क्रियते इत्यन्यत्र विस्तरः वासरूपसूत्रे भाष्यस्यैषा ९७ ननु अश्वः पक्षेत्यत्र वासरूपवि
धिना ल्टडुपि प्राप्नोतीति कृते आदेशे वैरूप्यादत आह ॥ लादेशेषु वासरूपविधिर्नास्ति ॥ आदेशकृतवैरूप्यं वा।
स्तलकारेषु समानास्तीत्यर्थः अत्र च हशश्वतोर्लङ् चेति लङ् विधानं ज्ञापकम् अन्यथा परोक्षे लिटा लङः स
मावेशात्सारूप्यात्सिद्धे इति किं लङ् विधानेन शश्वदादिभिस्तिङां समावेशार्थं शत्विधायके विभाषाग्रहणं ३०

न्वृत्तिर्लिटः कानज्क्वस्वोरेवाग्रहणं च कृतं तज्ज्ञापयति वासरूपसूत्रे ऽपवादश्चादेशत्वान्नानाक्रान्तः प्रत्ययएवा-
रब्धस्तत इति कैयटादेर्ध्वनितं तत्फलं तु सदादिभ्यो भूतसामान्ये लिटः क्वसुरेव न तु परोक्षेतिङ् इति बोध्यम् ९८
ननु ङमो ह्रस्वादित्यादौ ङमः परस्माच्चो विपरीतो ङम इति वा सन्देहः स्यादत आह ॥ उभयनिर्देशे पञ्च-
मीनिर्देशो बलीयान् ॥ अचीति सप्तमीनिर्देशस्य मयउञोवस्तुतदेव चाचरितार्थ्यात्पञ्चमीनिर्देशो नवका-
श इति तस्मादित्युत्तरस्येत्यस्यैव प्रवृत्तिः यत्र तु ङः सि धुडित्यादावुभयोरप्यचरितार्थत्वं तत्र तस्मिन्निति सूत्रापे-
क्षयात्तस्मादित्युत्तरस्येत्यस्य परत्वात्तेनैव व्यवस्थापवमुभयोश्चारितार्थ्यपि यथा मि सर्वनाम्न इत्यादौ तत्रामी
तिसप्तमी त्रेस्त्रय इत्यत्र कृतार्था आदिति पञ्चमी आज्जसेरसुगित्यत्र चरितार्थेति स्पष्टं तस्मिन्निति सूत्रे भाष्यकै-
यटे च ९९ नन्वतः कृकमीति सत्वमयस्कुम्भीत्यत्र न स्यात् कुम्भशब्दस्यैवोपादानादत आह ॥ प्रातिपदि-
कग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् समासरूपेण विशेषरूपेण वा प्रातिपदिकबोधकशब्दग्रहणे सति लिं-
गबोधकप्रत्ययविशिष्टस्यापि तेन ग्रहणे बाधोपि ना केवलस्यापीत्यर्थः अस्याश्च ज्ञापकं समानाधिकर-
णाधिकारेस्य कुमारः श्रमणादिभिरिति सूत्रे स्त्रीलिङ्गः श्रमणादिपाठः स्त्रीप्रत्ययविशिष्टश्रमणादिभिः
सह कुमारीशब्दस्यैव सामानाधिकरण्येन कुमारशब्दस्येति तज्ज्ञापकम् इयं च द्विपदस्यो विभाषुपपदविधौ।

महद्दात्वेसिन्स्वरविधौराजस्येब्राह्मणाकुमार्योर्बहोर्नञ्सुहत्तत्पदभूस्त्रीत्यादौसमाससंज्ञातग्रहणेष
वचनप्रवर्ततेइतिस्थाप्येभाष्येस्पष्टम् विभक्तिनिमित्तककार्यंवचनेनपठितत्वेव तत्रसमासान्तविधावप्येव
ग्रहणेएवंन समाससंज्ञातग्रहणेन प्रवर्ततएवस्वरविधावेवसमाससंज्ञातग्रहणेतत्रदोषोक्तेः बहुव्री
हेरुपसङ्ख्यानमितिसूत्रस्यभाष्याच्च एतावस्त्वेवानित्यत्वादप्रवृत्तिः दोषाःखल्वपिसाकल्येनपरिगणिताइतिभा
ष्योक्तेः नन्वेवंबहुव्रीहेरुपसंख्यानमितिसूत्रस्यभाष्यासंगतिः तत्रहिकेऽयंयथेनीत्यत्रनञ्जुतस्वेतिकर्वापादि
तोनयंतबहुव्रीहेरित्यर्थात् नयेतस्यबहुव्रीहित्वाभावान्तदसंगतिः नयेत्तानोपः समासइत्यर्थेनचपरि
हृतः नयन्तप्रकृतिकस्यवन्तोपरपदकः समासइतीतिचेन्न अनयापरिभाषयाघ्नीप्रत्ययसमभिव्याहा
रेतद्रहितेदृष्टानांप्रत्ययसमभिव्याहारेतद्रहिते दृष्टानांप्रातिपदिकत्वतद्व्याप्यधर्माणांविशिष्टविपर्यास
त्वमतिदिश्यतइत्याशयात् ॰ नन्वेवंपुनःपश्येत्यत्रेचपुवतीःपयेत्यत्रापिस्वपुवेतिसंप्रसारणंस्यादत
आह ॥ विभक्तौलिंगविशिष्टाग्रहणम् ॥ इयन्त्वपुवोरनाकावित्यत्रभाष्येचर्चदीग्रहणेनलिङ्ग·विशि
ष्टपरिभाषयाअनित्यत्वान्तल्लक्षेवेत्यन्ये ॰ ननुतस्यापत्यमितिएकवचननपुंसकाभ्यांनिर्देशाद्गार्ग्यौगा
र्ग्याइत्याद्यसिद्धमतआह ॥ सुवेलिङ्गवचनमतन्त्रम् ॥ अर्थेनपुंसकमितिनपुंसकग्रहणमस्याःज्ञापकम्

नित्यनपुंसकत्वार्थं तन्नतदित्यन्यत्र निरूपितं धान्यकलालन्यायेन नान्तरीयकतयातयोरुपादानमितितस्या
पत्यमित्यत्र भाष्ये स्पष्टम् अत एवाकञार सूत्रे एकेति चरितार्थमित्यन्यत्र विस्तरः ७२ ननु भ्रस्शादिभ्यो भू
ग्वेद्वेरितिविधीयमानः क्यङ्-क्वादिवा भ्रशाम्भवंतीत्यत्रापि स्यादत आह ॥ नजिवयुक्तमन्यसदृशाधिकर
णेतथाह्यर्थगतिः ॥ नञ्युक्तमिवयुक्तं वान्यत्किंचित्तत्सदृशे तेन ब्राह्मणादिभिन्नेन सदृशोऽधिकरणादृश्येकार्यं वि
ज्ञायते हि यतस्तथार्थगतिरस्ति नह्यब्राह्मणमानयेत्युक्ते लोष्टमानीय कृती भवति अतश्च्विं तमित्रे च्विं त
सदृशोऽभूततद्भावविषये क्यङ्-ङोक्तदोषः आपयेश्च विभक्तावप्रथमायामित्यादौ विभक्तिग्रहणाद्येतन्ना
यमिद्धार्थानुवाद एव एतेन विभक्ताविस्यायस्यानित्यत्वेज्ञापकमिति वदन्तः परास्ताः अनित्यत्वे भाष्यसम्म
तफलाभावात अत एवाकर्त्तरि चेति सूत्रे कारकग्रहणं भाष्ये प्रत्याख्यातमिति बोध्यम् स्पष्टा चेयं भ्रस्शादि
भ्यश्चेति सूत्रे भाष्ये अत्रान्यसदृशोपलक्षणमादृश्यस्यभेदाच्चटितत्वं सूचयति निरूपितं चैतन्मंजूषायाम ७३ ननु
ब्राह्मीकच्छपीत्यादौ सुवन्तेन समासान्नतेभ्यस्त्वन्नरङ्कुजाद्यंतर्भूतलक्षणाभावाज्जातिलक्षणो ङीष्न स्यादत आ
ह ॥ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ॥ उपपदमितिसूत्रे तिङ्-ग्रहणेनज्ञगाती
त्यत्र तत्पूर्वकघिणोनातिङ्-न्तश्च समासः तत्पर्यालनयोः सूत्रयोः सम्प्रत्येतस्यानिर्देशेकदेशानुमत्याकारकोश्च

प
३२

वसिद्धेयन्तो नास्त्यकीतीति सिद्धा अन्यथा पूर्वं दाप्यदनान्ताभावाच्छीशकरोऽग्नीतिप्रसङ्गात् अस्यानित्य
त्वात्कचित्सुब्रुत्पत्यनन्तरमपिसमासः यथासाहितस्यधनक्रीतेति ग्रन्थेत्वनित्यत्वेनमानंतत्राजादि
त्वाहाविस्याऽः अतएवकुम्भकारस्यत्रषष्ठीसमासोपिसुब्रुत्पत्ते पूर्वमेवषष्ठीसमासाभावेचोपपदस
मासकृतएकार्थीभावइतिनतत्रवाक्यमित्युपपदमितिसूत्रेभाष्येस्पष्टम् तत्रहिषष्ठीसमासादुपपदसमा
सोविप्रतिषेधेनेतिवार्त्तिकम् अथवाविभाषाषष्ठीसमासः यदानषष्ठीसमासस्तदोपपदसमासइतित
त्प्रत्याख्यानंच यद्यप्युपपदसमासस्यान्तरङ्गत्वाभिप्रायकंनद्याषष्ठीसमासाभावादुपपदसमासइति
वार्त्तिकमुक्तोक्तम् नयापितद्भयप्रत्याख्यानेयदमथवेत्यादिभाष्यम् परिभाषायांसमासात्वतःकारको
पादानेनकारकविभक्तंयतेनतल्लाद्धिः समासमात्रस्यसुब्रुत्पत्तेः पूर्वमेवलाभात् एतेनैवाकारकतद्विशेषो
पादानएवेतिपरास्तम् अस्याविध्येकवाक्यताभावेनविप्रतिषेधादिशास्त्रवकार्यमवस्थापकत्वेनोपा
दानएवेमर्थालाभाच्च १४ ननुगिदचांमित्यत्रयातोम्भ्रद्दुगीत्कार्यंतर्हि चरेतेदेवेतिनियमेनाधातोरेवनु
मिसिद्धेःधातुग्रहणंव्यर्थमतआह ॥ साम्प्रतिकाभावेभूतपूर्वगतिः ॥ तत्तद्वचनसामर्थ्यान्न्यायसि ३१
द्धेयम् तत्सामर्थ्यादधातुभूतस्यापीमर्थनयोमत्यतेः क्विपिगोमानित्यादौनुमसिद्धिः नासीत्या

दिसूत्रेभाष्येस्पष्टा ७८ बहुव्रीहौतद्गुणसंविज्ञानमपि ॥ अपिनाऽतद्गुणसंविज्ञानम् तेषांगुणाना
मवयवपदार्थानांसंविज्ञानंविशेष्यान्वयित्वमितितदर्थः यत्रसमवायसंयोगान्यतरसम्बन्धेनसम्ब
न्धस्यपदार्थस्तत्रप्रायस्तद्गुणसंविज्ञानंअन्यत्रप्रायोन्यत् लम्बकर्णचित्रगुरुदाहरणेसर्वादीनिजक्तित्या
दयइतिचोदाहरणेसर्वनामसंज्ञासूत्रेभाष्येएवस्पष्टा ७९ ननुवदःसुपिक्यपचेतिचेनानुकृष्टस्यपतोभ
वोभावस्तत्राप्यनुवृत्तिःस्यादतआह ॥ चानुकृष्टंनोत्तरत्र ॥ णमुल्यनुवर्तमानेऽप्येपर्यायाभिप्रेतेति
सूत्रेपुनर्णमुल्ग्रहणमस्याज्ञापकम् अन्यथाक्त्वाचेत्येववदेत् तद्धिउभयोरुत्तरत्रसम्बन्धार्थम् उदाहरणा
निस्फुटानि इदमनित्यम् अतएवतृतीयाचहोरित्यत्रचानुकृष्टायाअपिद्वितीयायाअन्तरान्तरेणेत्यत्रसम्बन्धः
लुटिवल्क्लृपइतिसूत्रस्यनानद्यतनार्थसकलचकारमतव्याख्यानेनविरुद्धेयम् व्याख्यानादेवानुवृत्तिनिवृत्त्यो
र्निर्वाहइतितदाशयात् कलिजाल्लुक्खौचेतिसूत्रस्यभाष्यविरुद्धत्वाच्च तथाहिद्विगोष्ठंश्चेतिसूत्रात्खनस्तत्रचेना
प्यनुकृष्टस्यखोऽनन्तरस्यामित्यस्यचानुवृत्तिंस्वीकृत्यलुक्खौचेतिभाष्यप्रत्याख्यातम् ८० नन्वनुदात्तादेरन्तो
देरन्तोदात्तात्वयदुच्यतेतद्व्यञ्जनादेर्व्यञ्जनान्ताच्चनप्राप्नोतीत्यतआह ॥ स्वरविधौव्यञ्जनमविद्यमानव
त् ॥ स्वरोद्देश्यकेविधावित्यर्थः नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमन्थिष्वितिसूत्रेपृथिव्यादिपर्युदासोऽस्या

ज्ञापकः अस्यास्थ्यादीनामनुदात्तादित्वाभावादप्राप्तेन दैयर्थ्यमस्पष्टमेव धर्मिग्राहकयानादेवचस्व
रोद्देश्यकविधिविषयमिदम् अत एव शास्त्ररनुमो नघजादीत्र्यचः कर्त्तव्यकीर्त्यादावजादीत्र्यचश्मादीनो
प॰ चारितार्थ्यम् अत एव राजवतीत्यादौ नलोपस्यासिद्धत्वादन्वतोशहत्वादनोवत्वाइतिस्वरोनोदश्चिता
३३ नित्यत्रद्रूस्वनुडम्भामितिमतुबुदात्तवचनेनत्याकरः स्पष्टं चेदं समासस्येतिसूत्रेभाष्ये उञ्छेरुदात्त इति
33 सूत्रेकैयटस्तस्थमनावश्यकीमभिव्याहृतात्ज्ञपरागेणाहलोपिउदात्तादिवदवभासात्तदुपपत्तेत्याह
तत्रभाष्येपिधनितमेतत् १८ नन्वेवमपिराजदृषदित्यादौसमासस्यान्त्योदात्तत्वेषकाराकारस्यन स्या
दतआह ॥ हलस्वरप्राप्तौव्यञ्जनमविद्यमानवत् ॥ अस्याश्रयतो नावश्न इति सूत्रेनोप्रतिषेधोज्ञापकः
नाषमित्यत्रादिनेकारेणनस्वरयोगेपायस्याकारस्तयोरेपानासावादिविन्तिस प्रतिषेधोनर्थकः नचादिवे
वनकारउदात्तगुणविशिष्टान्तरतमान्नयेत्यिति विवाच्यम् तथा सतिनिमित्तभूतस्यद्धुकत्वस्यविनाशाद्ध्प
जीव्यविरोधिनाग्रुदात्ताप्राप्तेरित्यन्यत्रविस्तरः स्पष्टाचेयंसमासस्येतिसूत्रेभाष्ये १९ ननुहरणागुणेति।
निषेधस्त्वपतिस्यात् दिवश्चादित्योत्वदिवःश्चिप्यपिस्यात्तथायतोनावश्नतिस्वरोएषत्यपिस्यात्तस्रट
शाडिगणइतिचडुपिस्याददतआह ॥ निरनुबन्धकग्रहणेनसानुबन्धकस्य २० तदनुबन्धकग्रहणे। ३३

नाऽतदनुबन्धकग्रहणम् ॥ वामदेवाड्ड्यड्ड्याविति सूत्रे ड्यड्ड्यतोर्डित्त्वमनयोर्ज्ञापकम् तद्धि ययतो
श्चातदर्थं इत्यत्रानयोरग्रहणार्थं ननुः परस्य यपदन्तस्यान्तरपदस्यान्तोदात्तमिति तदर्थः एवं चा वामदे
वेऽन्यपूर्वपदप्रकृतिस्वर एव भवति तस्मात्रानुबन्धकग्रहणेऽस्य चान्यस्यानुबन्ध्योयस्य तद्ग्रहणे नेत्यर्थः
एते च प्रत्ययाप्रत्ययग्रहणसाधारणादिवन्धीक्षिप्यादौ भाष्ये संचारितत्वात् वाग्रहणे चानयोरग्रहणमिति
तिश्चोड् आप इत्यत्र भाष्ये येनानुबन्धेन सानुबन्धकत्वं यद्यनुबन्धकत्वादिवातदनुच्चारणे एवैषा परिभाषाह
कमानात् तेन जश्शसोरित्यत्र नैषेति निरनुबन्धकत्वात् द्वितशस एवाग्रहणं स्यादिति न शंक्यम् एवम
न्यत्रापि तरानुबन्ध्योच्चारणे एव तेन वतोरचेत्यादौ वनिष्ठुक्तनिपोर्ग्रहणसिद्धिः एकानुबन्धकग्रहणे सम्भ
वतीति तत्रार्थान भाष्यादि सम्मतं इत्यन्यत्र विस्तरः ८९ ननु ऊदौरित्यादौ स्वार्थकत्वात् स्वार्थिकानां प्रकृ
तितो लिङ्गवचनानुवृत्ते र्न्यायप्राप्तत्वात्संख्यानुपपत्तिरेषु कल्पमित्यत्र नपुंसकत्वैकवचनयोरनुपपत्तिश्च
त्यत आह ॥ क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ णचः स्त्रियामिति सूत्रे स्त्रियामित्य
क्तिरस्याज्ञापिका अन्यथा कर्मव्यतिहारे णच् स्त्रियामिति णचः स्त्रियामेव विधानात् किं तेन स्पष्टा चेयं बहु।
ज्ञापके भाष्ये ९० ननु सपत्नी नगरी तिप्रवीरनाकाविति सूत्रभाष्यादाह तेरनः स्त्रियामिति कस्मादत।

आह ॥ समासान्तविधिरनित्यः ॥ एतेनैवाद्यन्तवत्सूत्रेऽन्तोदात्तत्वायांशादित्वराजनशब्दपाठो

ऽस्याज्ञापकः अन्यथा टचैवान्तोदात्तत्वे सिद्धे किं तेन द्वित्रिभ्यां पाद्दन्मूर्द्धस्विति स्वरविधायके भाष्ये स्पष्टेयम्

८३ ननु शतानीत्यादौ नुमि कृते षट्संज्ञा प्राप्नोति ततश्च लुक् स्यात् तथा उपादास्तेत्यत्रात्वे कृते स्थोघ्वा

प· ३४ 34 दित्वेतीत्वं प्राप्नोति अत आह ॥ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ सन्निपातो द्वयोः सम्बन्ध

स्तन्निमित्तो विधिस्तं सन्निपातं यो विहन्ति तस्यानिमित्तमित्यर्थः उपजीव्यविरोधस्यायुक्तत्वमिति न्यायमू

लेयं अत एवात्र सन्निपातशब्देन न पूर्वपरयोः सम्बन्धमेव किन्तु विशेष्यविशेषणसन्निपातोऽपि गृह्यते अत

एव ग्रामणिकुलमित्यादौ नपुंसकह्रस्वत्वे ह्रस्वस्य पिति कृतीति तुग् न प्रातिपदिकाजन्तत्वसन्निपातेन जा

तस्य ह्रस्वस्य तद्विघातकत्वात् तुका जन्तत्वविघातः स्पष्ट एव न चाग्र्याश्रयत्वेन ह्रस्वस्य बहिरङ्गतया

सिद्धत्वम् अर्थे कृतबहिरङ्गत्वानाश्रयणस्योक्तत्वात् किञ्चैवं तुकोऽसिद्धत्वे तद्बलात्कृतिनग्रहणाच्च

बहिर्वयोर्बहिरङ्गपरिभाषाया अप्रवृत्तेः सर्वविधं सन्निपातग्रहणादेव वर्णाश्रयः प्रत्ययो वर्णविचालस्यानि

मित्तं स्यादिति यत्तत्परिभाषादोषनिरूपणावसरे वार्तिककृतोक्तम् न हि प्रत्ययः पूर्वपरसन्निपातनिमित्त रा

कः स एव सन्निपातशब्देन गृह्यत इति मत्वा न प्रत्ययः सन्निपातनिमित्तक इति शंकापास्ता दम्भुपेत्येवादि

सञ्ज्ञा तद्भिन्ननिमित्तं स्यादित्येकदेशिनोक्तमिति न तद्भाष्यविरोधः किन्त्वेवं शैवो गार्ग्यो वैनतेय इत्या
दावप्यङ्गसञ्ज्ञाया लोपनिमित्तत्वानापत्त्या वर्णाश्रयत्वस्य वैयर्थ्यम् ग्रामणिकुलं ग्रामणिपुत्र इत्या।
दावुत्तरपदनिमित्तके ह्रस्वे यथाकथंचिद्बहिरङ्गपरिभाषया विचारणां सम्भवतीति कृन्मेजन्तः ह्रस्व
स्य पितीति सूत्रे चैकदेशिनानया परिभाषया तद्बाधितो भाष्ये अतएव परिभाषाफलत्वेनेदमुक्तं कृन्मे
जन्तसूत्रे वार्त्तिककृतेति केचित् सन्निपातलक्षणविधित्वमस्या लिङ्गम् स्वप्रवृत्तेः प्राक्सनिमित्तभूतो
यः सन्निपातस्तद्विघातकस्य स्वातिरिक्तशास्त्रस्य स्वयमनिमित्तमिति फलति नन्वेवं रामायेत्यादौ सुपि चे
ति दीर्घो नापत्तिः अदन्ताङ्गकृते सन्निपाते न जातस्य यादेशस्य तद्विघातकत्वात् न च यञादित्वमपेक्ष्य दी।
र्घस्य बहिरङ्गतयाऽसिद्धत्वान्नात्र सन्निपातविघात इति वाच्यम् आरोपितासिद्धत्वेऽपि वस्तुतस्तद्विघातस्य जा
यमानत्वेनैतत्प्रवृत्तेः किंचान्तरङ्गे कर्त्तव्ये बहिरङ्गस्यासिद्धत्वेऽपि तत्कृते तस्यासिद्धत्वे मानाभावः किंचा
तिदेशिकसन्निपातविघाताभावमादायैतदप्रवृत्तौ गोरीम्यादौ सम्बुद्धिलोपेऽपि स्यान्निवर्त्तनेन ह्रस्वनिमित्त
सन्निपातविघाताभावात्तत्रैतस्यातिव्याप्तिपरकृन्मेजन्त इति सूत्रस्थभाष्यासङ्गतिः सन्निपातस्याशास्त्री
यत्वाच्चात्रस्यानिवर्त्तकत्वमिति तत्त्वासिद्धत्वमपि कथमिति विभावय अप्रधानस्थीयेः सिद्धतापत्ते रीदूदेदिति सूत्रे

कैयटेन स्पष्टमुक्तत्वात् एवं च पूर्वत्रासिद्धीयेपि कार्ये एतत्परिभाषाप्रवृत्तिर्भवतीति चेन्न कष्टायेति निर्देशे
नतस्या अनित्यत्वात् ययोः सन्निपातस्य विघातकं शास्त्रं तयोः सन्निपातनिमित्तकविध्यनुपादानमपेक्षि
प॰ तमिति तु नाग्रहः नयवदाति दित्यत्राः कारान्तप्रकृती सन्निपातनिमित्ताद्घु॰ सन्ज्ञानयापरिभाषयाल्लो
३५ पस्य निमित्तं न स्यादित्याशंकाऽनित्यत्वेन समाहिता कृन्मेजन्तसूत्रे भाष्ये नसङ्घु॰ संज्ञायामदन्तस्यांगसन्ज्ञे
35 ऽस्त्युक्तमस्ति नच कुम्भकारेभ्य आधये इत्यादावव्ययसंज्ञायामनयापरिभाषया वारणापरभाष्यासङ्गतिस्त
यापरिभाषयालुङ्॰ माभूत् अव्ययत्वं तस्यादेव लुकादिति दीयसन्निपातस्य विघातेनाव्ययसंज्ञायाः संज्ञा।
फलं त्वकच्स्यादिति वाच्यम् एतदुदाहरणापरभाष्यप्रामाण्येन साक्षात्परंपरया वा स्वनिमित्तसन्निपातवि।
घातकस्य स्वयमनिमित्ततद्दर्शनाद्दोषात् एतेनाकच् स्यादित्यपास्तं न च कार्यकालपक्षे लुगेकवाक्यताप
न्नसंज्ञाबाधेऽप्यकजेकवाक्यतापन्नास्यादिति वाच्यम् अन्तरंगापीतदेकवाक्यतापन्नसंज्ञापांबहिरङ्गगुणा
देरसिद्धत्वात् लुगेकवाक्यतापन्नात्र गुणादितो बहिरङ्गत्वम् उभयोरपि शब्दतः स्वाश्रयत्वान्नयोःस्वयो
रिति ज्ञापकाच्चैषाः तित्यातेन नातिप्रसंगः स्पष्टा चेयं कृन्मेजन्त इति सूत्रे भाष्ये अस्या अनित्यत्वे फलानि। ३५
भाष्ये परिगणितानि वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तम् दाक्षिः १ आत्वं पुक्विधेः ज्ञापयति २

शुगन्तस्य अदीदपत् ३ न्यदाघकारस्थाविधेः यासेति ४ इद्विधिपिवकारलोपस्य पपिवान् ५ ह्रस्वनुड्भ्यां
मतुप् इत्यन्तोदात्ता उत्तरपदादिति मतुविभक्त्युदात्तत्वं हर्वनिघातस्य अग्निमान् परमवाचा ६ नदीह्रस्वत्वस्
य बुद्धिलोपस्य नादिकुमारीत्यादि ७ यादेशः स्पृपिचेति दीर्घत्वस्य ८ इत्याद्यत्र प्रवृत्तिरेव दोषाः खल्वपि साक
ल्येन परिगणितानीति भाष्ये क्ति त्यन्यत्र विस्तरः ९४ ननु पंचैतद्ग्रहणे देवता असप्तपंचैतद् इत्यादौ द्विगोर्लुगिति
णाल्लुकि लुक्तद्धित इति ङीप्रत्ययलुकानुकः अवगाणपतिस्तस्याह ॥ सन्नियोगशिष्टानामन्यतरापायेउ
भयोरप्यपायः ॥ अत्र च बिल्वकादिभ्यश्छस्य लुगिति सूत्रस्थं छग्रहणं ज्ञापकम् नहि छमात्रस्य लुग्बाधन
द्वाराकुकोऽनिवृत्तिर्यथा स्यादित्यर्थम् कृतकुगागमानन्तरोत्पन्नगणात् बिल्वादयपवत निर्दिष्टा बिल्वकादिशब्दे
न न चैवमपि छग्रहणं व्यर्थं कृतकुगागमानुवादसामर्थ्यादेव तदनिवृत्तिसिद्धेरन्यथा बिल्वादिभ्य इत्येव वदेत्
लक्षणप्रतिपदोक्तपरिभाषया बिल्वादिष्विरक्तारेण विहितप्रत्ययस्यैव लुग्विधानान्नातिप्रसंग इति वाच्यम् नेतो
विप्रतिपदोक्तत्वेन बिल्वादिभ्यो णेति विकारार्थस्य लुगापत्तिवारणार्थं कुगनुवादचारितार्थ्यात् समत्वपार्थ
कुवशात्पूर्योगेन विधेययोरेककालिकत्वैकदेशत्वनियमात्प्राप्तसिद्धापीयम् यत्तु गाणिवृष्टवदित्यनेन नपुंसव
त्वविधानमेतदनित्यत्वज्ञापनार्थम् अन्यथा पत्नयतीमादौ टिलोपेनेव ङीपि निवृत्ते सन्नियोगविशिष्टप

विभाषयानस्यापिनिहूमैनयनीत्यादिसिद्धेर्णुवत्त्ववैयर्थ्यं स्यादित्यमेयतिदेरितिसूत्रेकैयटस्तत्र इडविडमाचष्टे ऐडवि
डयतीत्यादौ णुवत्त्वस्यावश्यकत्वात् येनेयः श्रेयने परत्वादिनस्यानिवर्तनेन सिद्धमित्यस्य च विस्तरः ८५ ननुचु
प॰ चुराशीलमस्याः साचौरीत्यादौ शीलं छत्रादिभ्योऽणोऽनीषन प्राप्नोत्यत आह ॥ ताच्छीलिकेणेऽणकृतानिभवं।
३६ ति अनित्यणि विहितप्रकृतिभाववाधनार्थकामस्ताच्छील्ये इतिनिपातनमस्या ज्ञापकम् ताच्छीलिकेणि
36 तादेणाद्यचइतिफिन्नसिद्धिरप्यस्याः प्रयोजनमितिनव्याः ताच्छीलिकेरत्युक्तेस्तदस्यांप्रहरणमितिणो।
दाणेऽत्येवकार्मेइति सूत्रे भाष्येस्पष्टा ८९ ननुकंसपरिमृड्भ्यामित्यादौ मजेर्हृद्धिडेर्वारेत्यत आह ॥ धातोः
कार्यमुच्यमानं तत्प्रत्यये भवति ॥ भौणाहृत्येतितत्त्वनिपातनेचास्याज्ञापकम् धातोः स्वरूपग्रहणे तत्प्रत्य
येकार्यविज्ञानमितिपागस्त्यप्रस्कृड्भिरित्यादावनुदात्तस्य चर्दुपधस्यत्यमापादनेन भाष्ये दूषितः यत्कार्यंप्र
त्ययनिमित्तकं तत्रैवं प्रत्ययस्यापिकातेन पदान्तत्वनिवन्धनेन शेर्वेतिकुत्वं प्रणारभ्यामित्यादौ भवत्येवरुय
ङादिविधौ तेनैषानभ्रस्तुधियोरितिनिषेधेनानित्यत्वात् मजेर्हृद्धिरित्यत्र भाष्ये स्पष्टैषा ९० ननुसर्वकेऽश्व।
केरित्यादौ सर्वनामाव्ययसंज्ञेन स्यातामत आह ॥ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ नेदमदसोरकोरिति
प्रतिषेधोऽस्याज्ञापकः तदेकदेशभूतंतद्ग्रहणेन गृह्यतइतियेनविधिरितिसूत्रेभाष्येपाठः ९१ ननुगातिस्था ३६

घुपाभ्भ्यः इति सिचोऽलुगायासीदित्यादौ प्राप्ते पि स्यादत आह ॥ लुग्विकरणालुग्विकरणयोरलुग्वि
करणस्य ॥ अस्याश्च ज्ञापकं स्वरतीति सूत्रे सूङ् इति वक्तव्ये सूतिसूयत्योः इत्यद्भि·ई श इति कैयटः तन्न साह
चर्यादलुग्विकरणस्यैव ग्रहणप्राप्ते इत्यद्भि·ई श इत्येतज्ज्ञापकं चिन्त्यम् ध्वनिता चेयं परिभाषा यस्य विभाषे
त्यत्र भाष्ये नन्वद्य विविदितः इति प्रयोगे निषेधमाशंक्य यदुपाये विभाषा तदुपाये निषेधः विभाषागामहन्नविदा
विशामिति सूत्रे शविकरणस्य ग्रहणं लुग्विकरणस्यायमित्युक्तम् तत्र चोद्दैतौ यतोऽयं लुग्विकरणोऽतो वि
शिसाहचर्याच्छविकरणस्यैव ग्रहणं न तु रुनिसाहचर्याद्दस्यापि एतत्परिभाषाविरोधादिति तदाशयः
अत एव परिभाषायां लुग्विकरणस्यैवेति नोक्तम् केवलं भाष्ये एषा क्वापि न पठिता गातिस्थेति सूत्रेऽपि
वर्तेर्ग्रहणं कर्तव्यमिति वार्तिककृता सर्वत्रैव पाग्रहणे लुग्विकरणस्य ग्रहणमिति भाष्यकृता चोक्तम् स्वरती
ति सूत्रे कैयटेन च स्पष्टमुक्ता ९९ ननु प्रनिवाय पिषतीत्यादौ हेरचङीति विधीयमाने कुत्वं न स्यादत आह ॥ प्रकृ
तिग्रहणे ण्यधिकस्यापि ग्रहणम् ॥ अचङीति प्रतिषेध एवास्या ज्ञापकः इयं च कुत्वविषये वहेरचङीति सूत्रे
भाष्ये स्पष्टेयम् ९० नन्वस्मभ्यमित्यादौ भ्यसरभ्यस्यमितिच्छेदे भ्यसो भ्यमित्यनेन लोपे प्रवृत्ते स्यादत आह ॥
अङ्गवृत्ते पुनर्वृत्तावविधिः ॥ अङ्गेऽङ्गाधिकारे वृत्ते निष्पन्ने यत्कार्यं तस्मिन् सति पुनरन्यस्यांगकार्यस्य प्रवृत्तौ प्रवृत्ताव

विधानंभवतीत्यर्थः यथाचज्यादादीयसस्तुत्याद्विधानेनज्ञापिता अन्यंयकारलोपेनाकृत्सार्वेतिदीर्घेण च।
सिद्धौनद्वैयर्थ्यंस्पष्टमेव अतएवभिन्नस्थानिकांगकार्यविषयाप्येषा इयंचानित्याद्वयोरितिनिर्देशात् अनित्य
प॰ त्ववललभ्याथमादायैवभ्यसोभ्यमितिसूत्रेभाष्येपरानिष्ठितस्येतिपठितम् केचित्तनयापरिभाषयानकिंचि।
१० ल्लस्यंसाध्यते अतएवत्ता नोर्जाज्यादादीयसश्इतिसूत्रयोरेनांज्ञापयित्वाकिंप्रयोजनमितिप्रश्नेअपिवत्तेगुणा
५७ प्रतिषेधउक्तः सनवक्तव्यात्येवमप्रयोगमुक्तंनतलत्यक्षिद्धिरूपे नउक्तंभ्यसोभ्यमित्यत्राभ्यमित्येवछेदः शेषे।
लोपस्थान्त्यलोपएवअतोगुणाइतिपररूपेणासिद्धंयुष्मभ्यमित्यत्रनिरूपितं एवंचसूत्रद्वयस्यैतज्ज्ञापनपरं
भाष्यंभ्यसोभ्यमितिसूत्रस्थंचभाष्यमेकदेश्युक्तिरित्याहुः ९१ यत्तेश्रीरोदितिवाच्येश्रीगुणाइतिगुणाग्रहणा
त्संज्ञापूर्वकविधेरनित्यत्वंइयंचविधेयकोटौसंज्ञापूर्वकत्वएव तेनस्वायंभुवमितिसिद्धम् तथानिलोडिमे
वसिद्धेयानिग्रहणादागमशास्त्रमनित्यम् तेनतत्तेकामस्येतिसिद्धम् तथातनादिपाठादेवसिद्धेतना।
दित्कृञ्यइतिसूत्रेकृञ्ग्रहणाज्ज्ञाणकार्यमनित्यन्तेननविभ्यसेदविभ्यस्त्वमितिसिद्धंचक्षिङोङि॰करणादनु
दात्तेत्वलक्षणमात्मनेपदमनित्यम् तेनस्फायपित्रिमीकेत्यादिसिद्धम् तथाविनार्थनञासमासेनानुदात्तेप १९
दमनेकमित्येवसिद्धेवर्जग्रहणाद्व्रजञ्चादिनमनित्यम् तेननेपङ्॰वङि॰त्यस्यानित्यताद्देमसङ्गइतिसिद्धमि।

तितत्र भाष्ये ऽदर्शनात् भाष्यानुक्तत्वापित्तार्थस्य साधुतानियामकत्वे मानाभावात् भाष्याविचारितप्रयो-
जनानां सौत्रावृत्ताणोपारायणादावदृष्टमात्रार्थकत्वकल्पनापायवैचित्यात् किंचत्तापिते विश्वानीत्यस्य
नसाधुत्वमावागमशून्यप्रयोगाप्रसिद्धेः आयरहणात्तु लोहुग्रहणवदितिबोध्यम् अतएव ह्यो लोपोलेटि वे
तिसूत्रे वेतिसूत्रे वेति प्रत्याख्यानम् लोपे पि आडुपदेशे आटः श्रवणमविष्यति दधादिति अदधदिति आ
गमशास्त्रस्यानित्यत्वे त्वादित्यं प्रसतिदधादिरूपस्यासिद्ध्यावाग्रहणस्यावश्यकत्वेन तत्प्रत्याख्यानासंगतिः स्पष्टे
व एतेनव्यत्ययैकेयटेके चिदित्यादिना अस्यैव वाग्रहणस्य तदनित्यत्वज्ञापकता कासापि चिंत्या प्रत्याख्यानपरभा
ष्यविरोधात् चक्षिङे उकारस्यान्तेदित्वाभावसंपादनेन चारितार्थ्याच्च तनादिसूत्रे कृञ्ग्रहणस्य भाष्ये
प्रत्याख्यानाच्च एवमेवातिदेशिकमनित्यं सर्वे विधयो लोपविधिविधिर्बलवानित्यादिभाष्यानुक्तेबो
ध्यम् स्वापं भुवमित्यादि लोके साध्वेवेत्यन्यत्र विस्तरः यदपि ननु हन्तेर्यङ् लुकि आशीर्लिङि वधादेशो न
स्यादत आह ॥ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति ॥ पाश्वहितत्वस्यादिः प्रयोगत्वसिद्धान्ते न प्रयो
गस्य यङ्रूपसमुदाये प्रकृतिरूपत्वबोधनेनेदं न्यायसिद्धम् अतएव जङ्घीत्यादौ हित्वं कृतेऽपि तत्सिद्धिरिति
तदपि न भाष्ये ऽदर्शनात् किंच तेन सिद्धान्तेन प्रत्येकं द्वयोस्तत्त्वबोधनेऽपि समुदायस्य तत्त्वबोधने मानाभावः अतए

वदयतेर्दिगीति सूत्रेऽस्तेः परत्वाद्द्वित्वे कृते परस्यास्तेर्भूभावे पूर्वस्य श्रवणं प्राप्नोतीत्याशङ्क्य विषयसप्तम्या
श्रयणेन परिहृतं भाष्ये अन्यथा त्वदुक्तरीत्यैकाज्द्विर्वचनन्यायेन समुदायस्यैवादेशापत्तेस्तदसंगतिः स्पष्टै
व तस्मादुत्तरखण्डमादायैव यथायोगं तत्कार्यप्रवृत्तिर्बोध्या भूसुवोरित्यस्य तदन्ताङ्गस्येत्यर्थान्नास्य गुण
प निषेधस्य बोभूतुरिति निपातनं तद्विरोधस्तस्माद्धुतेर्यङ्लुकि बध्यादित्यादिभाष्यवाघुदाहृतं चिन्त्यमेवेत्य
३८ न्यत्र विस्तरः ४८ यदपि नवग्रहविर्यस्याचामादिविस्पष्टैकपरिभाषोपस्थितौ शालीयायसिद्धिरत आह ॥ वि
386 धेयोपरिभाषोपतिष्ठतेनानुवादे ॥ अनूद्यमानविशेषणेऽनुतन्नियामकपरिभाषानोपतिष्ठत इति तदर्थः वि
ध्यङ्गभूतानां परिभाषाणां विधेये नासिद्धत्वापासमवन्यासम्भवेपि तद्विशेषणेऽव्यवस्थापकत्वेन चरितार्थानां
तद्विशेषणव्यवस्थापकत्वे मानाभाव इति तर्कमूलेयम् किंचोदीचामातःस्थाने इति सूत्रे स्थाने ग्रहण
मस्यालिङ्गम् अन्यथा षष्ठी स्थाने इति परिभाषयैव तल्लाभे तद्वैयर्थ्यं स्पष्टमेवेति तत्र उदात्तस्वरितयोर्य
ण इत्यादौ ष्यङः संप्रसारणमिति सूत्रभाष्योक्तरीत्या ऽल्लोपोन इत्यादौ चतस्याभिचरितत्वात भाष्यानु
क्तत्वाच्च स्थानसम्बन्धो न परिभाषालभ्य इत्यर्थस्य षष्ठी स्थाने इति सूत्रे स्पष्टमुक्तत्वेन त्वदुक्तज्ञापकासम्भवा ३८
त्तत्र स्थानग्रहणं तत्स्पष्टार्थमेव किंच विधेयोपरिभाषोपतिष्ठत इति प्रवाद इको गुणवृद्धी अचश्चेत्यनयोर्वि

धीयत इत्यथ्याहारमूलकोऽन्यत्र तु नाऽस्याः फलमित्यन्यत्र विस्तरः ९२ ननु नमस्करोति देवान्नमस्यति
देवानित्यादौ नमः स्वस्तीति चतुर्थीं वारयत्यत आह ॥ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ कारक
विभक्तित्वं च क्रियाजनकार्थकविभक्तित्वम् तच्च प्रथमायामप्यस्तीति सापि कारकविभक्तिरिति सहयु।
क्ते इत्यादिसूत्रे भाष्ये ध्वनितं इदं च वाचनिकमेव अत एव यस्य च भावेनेति सप्तम्यपेक्षयाऽधिकरणसप्तम्या
बलवत्त्वमनेन न्यायेन तत्र च दीयत इति सूत्रे भाष्ये ध्वनितं कैयटेन तु स्पष्टमुक्तम् एतेन क्रियान्वयित्वं कार।
कत्वमित्यपास्तम् यस्य च भावेनेति सप्तम्या अपि क्रियान्वयित्वात् येन प्रधानीभूतक्रियानिमित्तकार्यत्वेन का
रकविभक्तीनां बलवत्त्वं वदन्ति तेषामुभयोरपि क्रियासम्बन्धनिमित्तकत्वेन तदसङ्गतिः स्पष्टैव नमोवरिव
इति सूत्रे नमस्यति देवानित्यादौ चतुर्थीवारणाय भाष्ये उपन्यासस्यासङ्गतेश्च एतेन क्रियाकारकसम्बन्धो
न त्वङ्ग इति तन्निमित्ता विभक्तिरन्तरङ्गा उपपदार्थेन तु यत्किंचित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्नि
मित्ता विभक्तिर्बहिरङ्गेत्यपास्तम् नमस्यतीत्यत्र नमः पदार्थस्यापि क्रियाकारकभावेनैवान्वयात् अत्र च नमः
पदार्थस्यापि क्रियात्वमस्तु यतो नमस्त्वस्यैव सहयुक्त इत्यादौ चाप्रधाने प्रथमासाधनार्थमियं भाष्ये उपन्यस्ते
त्यन्यत्र विस्तरः ९३ नन्वेवमग्र्यडित्यादौ पूर्वस्यापि मुक्तापत्तिरत आह ॥ अनन्त्यविकारेऽन्त्यसदेशस्य अन्त्य

प०
३५
39

सदेशानन्त्यसदेशयोरेकप्रयोगेऽगपत्त्याभावनत्यसदेशस्यैवेत्यर्थः अन्यथायाताद्वादेर्नेत्वसत्वेनेनासोते
त्यादावेव स्यात्तांनत्वनमतिसिंचतीत्यादौ अनंत्यविकार इति चलिङ्‌ःम अन्येनसमानोदेशोयस्येत्यान्त्यसदे
शः नत्वंचात्यवर्णात इणिधोवितराग्यवथानेनवोध्यम् अतएवविद्ध इत्यादौ थंनसंप्रसारणमितिचविता
र्थम् अल्लोपोनइत्यादेरनस्तदेणत्यादावाद्याकारादावप्रवृत्तिरस्याः फलम् यजादिपरान्नन्ताङ्‌स्याका
रस्यलोपस्तमर्थस्यैवाङ्गंशेप्रत्ययस्थोत्थिताकांनततयोचित्यात् अङ्गावयवस्ययजादिपरस्यानइत्यादिक्र
मेणानेककल्पिष्टकल्पनापेक्षयाऽस्याउचितत्वात् नचैवाष्यऊः संप्रसारणमिति सूत्रेभाष्यप्रत्याख्या
नेतिभ्रमितव्यम् वार्तिकोक्तफलानामनेकक्लिष्टकल्पनाभिरन्यथासिद्धिप्रदर्शनायैवात्येतस्याः परि
भाषायाः प्रयोजनानितदर्थमेषाकर्तव्याप्रतिविधेयंदोषेषुप्रतिविधानंचोदात्तनिर्देशात्सिद्धमित्युपसंहा
रात् मिमार्जिषतीत्यर्थंचसातत्रवृत्ते: पूर्वमन्तरङ्‌त्वाद्धित्वेपरत्वादभ्यासकार्येततोऽभ्यासेकारस्यद्व
हिवारणायसावश्यकी नचवृत्तेद्वौपुनरभ्यासरूपत्वेनसिद्धिः लक्ष्येलक्षणस्येतिन्यायेनपुनरप्रवृत्तेः यत्त
नसंप्रसारणइतिसूत्रेभाष्येनैतस्याः परिभाषायाः प्रयोजनानीत्युक्तम् तस्यायमर्थः एतत्सूत्रप्रयोजा
नानिभवन्तीतिव्यघादावनत्यसमानदेशयणोभावात् नैतान्येतस्याः प्रयोजनानीतिपाठेकचिद्दृश्यते वाच ३५

निकेवैषा स्पष्टा च षष्ठ्य इति सूत्रे ऽदसो मे इति सूत्रे च केचिदन्त्यसदेशस्येत्यनेन भाष्यस्त्वत्पत्र विस्तरः १४
नन्वव्यक्तानुकरणस्यात इति पररूपं पतत् इति पटितीत्यादावलोन्त्यस्येत्यन्त्यस्य प्राप्नोतीत्यत आह ॥ नान
र्थकेलोन्त्यविधिरनभ्यासविकारे ॥ अनभ्यासेत्युक्तेर्बिभर्तीत्यादौ भृञामिदित्यादावन्त्यस्यैवाभ्या
सोनर्थकोर्थाध्याहृत्यभावात् किन्तु तावदेवार्थवानित्यन्यत्र निरूपितम् एषा लोन्त्यसूत्रे भाष्ये स्पष्टा ॥
फलानामन्यथासिद्धिकथनेन प्रत्याख्याता चेति तत एवावधेयम् १५ ननु ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चे
त्यादौ पुमान् स्त्रियेत्येकशेषापत्तिः स्त्रीत्वपुंस्त्वातिरिक्तकृतविशेषाभावादत आह ॥ प्रधानाप्रधानयोः
प्रधाने कार्यसम्प्रत्ययः ॥ तेन प्रधानस्त्रीत्वपुंस्त्वातिरिक्ताप्रधानस्त्रीपुंस्त्वकृतविशेषस्यापि सत्त्वेन न दोषः
स्पष्टा चेयं पुमान् स्त्रियेत्यनपुंसकमनपुंसकेनेत्यादौ भाष्ये अन्तरङ्गोपजीव्यादपि प्रधानं प्रबलमिति हेतु
मतिचेत्यत्र भाष्यकैयटयोः १६ ननु स्वस्रादिनप्रयुक्तो मातृशब्दस्य ङीन्निषेधः परिच्छेदवाचकमातृश
ब्देऽपि स्यादत आह ॥ अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ तेन स्वस्रादिस्थस्य जननीवाचकस्यैव ग्रह
णं न तु परिच्छेदवाचकस्य योगजबोधे तदनालिङ्गितरूढ्यर्थोपस्थितिः प्रतिबन्धिकेति मधूत्पत्तिरेतद्बीजम्
रथकाराधिकरणन्यायसिद्धोयमर्थः कश्चिद्दीधीवेवीटामित्यत्रानया परिभाषयादीधीङ्वेवीङोरेव ग्रह

णं

प. ४०
40

एं नन्तदीङ्·धीङ्·वेञ्वीनामिति तत्र तथा सति दीवेधीवीटामित्येव वदेदित्यन्ये ९७ ननु वा तातयनार्थिया
वान्तिः वङो वैकल्पिकत्वाङ्गान्तरं त्याग पि स्यादत आह ॥ व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ तस्या
नुसाराद्व्यवस्था बोध्या शाच्छोरिति सूत्रे लटः शतृ इत्यादिसूत्रेषु च भाष्ये स्पष्टा ९८ विधिनियमसम्भवे वि
धिरेव ज्यायान् ॥ नियमे हि प्रकृताया अन्यनिवृत्तेः सामर्थ्यात्परिकल्पनमुक्तानुवाददोषश्चेति लाघवा
द्विधिरेवेति बोध्यम् यस्य हलः इत्यत्र इजादेः सनुम इत्यादौ च भाष्ये स्पष्टा ९९ ननु आशंसायां भूतवच्चेत्यने
नलुङ्·इवलङ्·लिटोरप्यतिदेशः स्यादत आह सामान्यातिदेशे विशेषानतिदेशः ॥ सामान्योपस्थिति
कालेनियमेन विशेषस्यानुपस्थापकसामग्र्यभावो ऽस्याबीजं तेनानद्यतनभूतत्वरूपविशेषविहितयोर्ल्लयो।
र्नातिदेशः इयमनित्या नल्पपीति लिङ्गात् तेन स्थानिवत्सूत्रे ऽणि विशेषातिदेशोपि स्पष्टं चैतत्सर्वं स्थानि
वत्सूत्रे भाष्ये १०० ननु तिन्स्वरितमिति स्वरितत्वं किरतीत्यादावपि स्यादत आह ॥ प्रत्ययाप्रत्यययोः प्र।
त्ययस्यैव ग्रहणम् ॥ इयं चाङ्गस्येति सूत्रे भाष्ये पठिता वर्णग्रहणे च न प्रवर्तत इति तत्रैव कैयटे स्पष्टम् अत
एव स नाशंसभिक्षउः बले इत्यत्र सन्वलयोः प्रत्यययोर्ग्रहणं परे तु तिन्स्वरितमिति सूत्रेपि एषा परिभाषा ला।
स्य संस्काराय भाष्ये क्वापि नाश्रितेति कैयटेनोक्तम् अङ्गस्येति सूत्रे तत्प्रत्याख्यानापि एवा भाष्ये एकदेशिनोक्ता। ४.

अत एवतितिप्रत्ययग्रहणं कर्त्तव्यमिति वार्त्तिक कृतोक्तम् उक्तसूत्रयोर्व्याख्यानात्प्रत्यययोरेव ग्रहणमि
त्याहुः ॥ ननु विपराभ्यां जेरित्यात्मनेपदं परा सेनां जयतीत्यर्थके पराजयति सेनेत्यत्र प्राप्नोतीत्यत आ
ह ॥ सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ तेन विशब्दसाहचर्यादुपसर्गस्यैव पराशब्दस्य
ग्रहणमिति तत्रैव भाष्ये स्पष्टम् सहचरणं सदृशयोरेवेति सहचरितशब्देन सादृश्यवानुच्यते रामलक्ष्म
णावित्यादावपि सादृश्यमेव नियामकम् सदृशयोरेव सहविवक्षा तयोरेव सहप्रयोगाद् उत्सर्गाच्च ध
नितं चेदं कर्मप्रवचनीययुक्ते द्वितीयेति सूत्रे भाष्ये तत्र हि पंचम्यपाङ्परिभिरित्यनेन लक्षणादिद्योतकप
रियोः पंचमीमाशंक्य यद्यप्यपपरी दृष्टापचारौ वर्जने चापं त्वलक्षणे अपशब्दो दृष्टापचारो वर्जनार्थ एव कर्म
प्रवचनीयस्तस्य कोन्यः सहायो भवितुमर्हतीति अन्यो वर्जनार्थात् यथा स्वर्गोः सहायेनार्थ इति गौरेवानी
यते नाश्वो न गर्दभ इत्युक्तम् तेन हि सदृशानामेव प्रयोगे सहायभावो बोधितः हि स्विश्चन्द्र इति सूत्रे सा
हचर्येणोव कृतोर्थानां ग्रहणं सिद्धे कृन्नार्थग्रहणादेशाः नित्यातेन दीधीवेवीटामित्यत्र यथा तत्साहचर्य्ये
प्याग मस्येदो ग्रहणमित्यन्यत्र विस्तरः ॥ नन्वस्त्रीत्याघनङ्ः प्रियसक्थ्ना ब्राह्मणेनेत्यत्र स्यात् अनङ्ः स
नपुंसकत्वाभावादत आह ॥ कृतान्तमितयोः कृतसम्बन्धी बलवान् ॥ कृतेनैव सम्बन्धो नान्तमितेन ।

प्रकारणादिग्रामेणेत्यर्थः प्रकरणादितः श्रुतेर्बलवत्वादितिभावः एवंचनत्रलिङ्ग-मस्यादीनामेवविशे
षणेनाङ्गस्य शिशीलगत्नुमविधिषुतत्त्वत्तः समासस्याभावात्प्रकरणप्राप्ताङ्गस्यैवनपुंसकत्वेयथास्या
त् बहुधाददतो येषु तानि कुलानि बहूददतीत्यत्रमाभूत् बहूनिददन्ति येषुबहूददन्तीत्यत्रयथास्यादि
प॰ त्येवमर्थस्य स्पष्टं चेदं स्त्रियोर्नपुंसकादित्यत्रभाष्ये केचित्तु अचोरहाभ्यांद्वे इत्यत्र श्रुतेन रेफस्य निमित्तत्वेनयरे
५१ तभावात् अनुनिमित्तं कार्यनिमित्तं वाध्यत इत्येतदुदाहरणमाहुस्तत्र तत्रैकोगिद्वन्यायेन सिद्धेरित्यन्यत्र विस्तरः १२
ननुतत्पुरुषेतत्स्यार्थेतिस्वरः परमेणाकारकेणपरमकारकेणेत्यादौस्यात् तथागतिस्याङ्गुपाधस्यइति
लक्षणैकपश्चिषणाइत्यतः कृतानात्वरस्यापिस्यादत आह ॥ **लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवग्रहणम्** ॥
लक्षणंलाक्षणिकमुपचारात् तत्तद्विभक्तिविशेषाद्यनुवादेनविहितो हि समासादिः प्रतिपदोक्तस्तस्यैव।
श्री ग्रहणंशीघ्रोपस्थितिकत्वात् द्वितीयो हि विलम्बोपस्थितिकः येइत्यस्यपाइति रूपं लक्षणानुसन्धानपूर्वकं विल।
म्बोपस्थितिकं पिबतेस्तु तच्छीघ्रोपस्थितिकं इदमेव हि परिभाषाबीजम् इयंचवर्णग्रहणेपिप्रोत्सेमा
ष्वसंचारितत्वात् यत्रवर्णग्रहणंनेषा अदेचइत्यत्रोपदेशग्रहणादितित्तत्सिद्धेव सूत्रे शब्देन्दुशेखरे हषि
तमितितत एवदृष्टव्यम् अनित्याचेयम् भवस्रमहावाहतेविति महावाहुतिग्रहणादित्यन्यत्रविस्तरः ९४ ५१

नन्वेवं देङो दीधातोश्च कृतात्वस्य घुसंज्ञा न स्यात् तथा मेङः आत्वे प्रणिमातेत्यादौ नेर्गदेति णत्वमपि न स्यात् तथा
गैः त्वप्रत्यामात्वेऽगुमास्थेतीत्वं न स्यादत आह ॥ गामादाग्रहणेष्वविशेषः ॥ अत्र च ज्ञापकं देवः पित्वं तद्धि अदाबिति
सामान्यग्रहणार्थं अन्यथा लाक्षणिकत्वादेव विधौ तद्ग्रहणासिद्धेः किं निषेधे सामान्यग्रहणार्थं नपित्वेन ते
नैचकदेशानुमितिद्वारा संगृहीणायपरिभाषा ज्ञाप्यते रयं च लक्षणप्रतिपदोक्तपरिभाषानिरनुबन्धकपरिभा
षा लुग्विकरणपरिभाषाणां बाधिका दाधाघ्वदाबिति सूत्रे भाष्ये स्पष्टा गातिस्थेति सूत्रे इणादेशगाग्रहणमेवेष्य
त इति न दोषः त्वस्यमत्र विस्तरः १७ ननु वृद्ध्यादिसंज्ञाः समुदाये स्युरत आह ॥ प्रत्येकं वाक्यपरिसमाप्तिः ॥
देवदत्तादयो भोज्यन्तामितिवत् अभिजिवत् १८ नन्वेवं संयोगसंज्ञा समाससंज्ञाऽभ्यस्तसंज्ञा अपि प्रत्येकं स्युर
त आह क्वचित्समुदायेऽपि ॥ गर्गाः शतं दण्ड्यन्तामर्थिनश्च राजानो हिरण्येन भवन्तीत्यादौ दण्डनवत् लक्ष्या
नुरोधेन च व्यवस्था १९ ननु वृद्ध्या त्वमाविति पञ्च भाक्षिपद्ते दीर्घनिर्देशादन्तात्वेन ग्राहकत्वं भाव्योदात्तादयस्य
तमोच्चारणे त्वस्वरकस्य संज्ञा न स्यादत आह ॥ अभेदकाः गुणाः ॥ अस्तीति यत्नेन स्वरूपेणोच्चारितो गुणो न भेद
कोऽनविवक्षितश्चत्यर्थः अत्र चास्य इदधीत्याद्यन्तःकर्णदेरुदात्तस्येवोच्चारणे न सिद्धे उदात्तग्रहणं ज्ञापकम् स्वरू
पेणोच्चारितत्वस्यैकेरनुदात्तादेरनुदात्तादिष्वदात्तादिशब्दोच्चारणे विवृत्तैव उऋ ऋ इत्यत्रानुनासिकपवोच्चा

रणीयेवोध्यापयितिमथिस्मत्तामादित्यादौ स्थान्यनुरूपतयाऽनुनासिकोच्चारणीयेऽनिरनुनासिकोच्चारणा
द्विवक्षा एतदर्थमेवासतिप्रबन्धकत्वम् नचैवमस्थ्यादीनांनविषयस्तेत्याद्युदात्ततयान्त्यादेशस्यानङः स्थान्य
प० ४२ 42 नुरूपेऽनुदात्तएवोच्चारणीयेऽनुदात्तोच्चारणांविवक्षार्थंभविष्यतीतिकथमस्यज्ञापकत्वमितिवाच्यम् एवमा।
स्थिशब्दादावन्तोदात्तेउदात्तगुणकस्यापिस्थानिनेनविवक्षायांमानाभावात् चतसर्याद्युदात्तनिपातनेनक
रिष्यतेवयादेशेआद्युदात्तनिपातनंकरिष्यतेपदादयोः नोदात्तानिपात्यन्ते सहस्यसउदात्तोनिपात्यतइत्यादि
भाष्यं तत्पक्षकृत्याः श्वाध्यायीपाठे क्वचिदुदात्ताद्युच्चारणांविवक्षार्थमित्याशयेन त्रेस्त्रयीणामग्ग्रेतिपदेतत्
ज्ञापकपरंभाष्यमितिकैयटादयः एवंचनिपातनेनानामानाम्नाइत्यप्रयोगेप्राप्तेऽन्याहृशप्रयोगाकरणेनतद्रूपा
यन्नातत्रतत्रोदात्तादिविवक्षा तिसृचतसृइत्यत्रापिद्वन्द्वमयुक्तेनोदात्तेउच्चारणीयेआद्युदात्तोच्चारणाम्।
अन्यत्रस्थान्यनुरूपेस्वरेउच्चारणीयेतत्तदुच्चारणांविवक्षार्थंसम्प्रणिपाध्यायीआचार्याणोकक्रत्यापठितेत्यत्र
नमानेकचित्पदस्यैककृत्यापिपाठेयथादाणिउनायनादिसूत्रेपेत्वाकेति यथाष्यैतारएकश्रृत्यैवाङ्गनि।
पठन्तिब्राह्मणावत्तथापिव्याख्यानतोऽनुनासिकत्वादिवदुदात्तनिपातनादिज्ञानमित्याहुः विधेयांशविषये ४२
तुअप्रत्ययइतितिवधात्रगुणाभेदकत्वेनसवर्णग्रहणाम् अतएवचदवदित्यादौमन्त्रोमस्यनानुनासिको।

वकारः अंतएव तद्धानामामिति सूत्रनिर्देशः अमयाप्रत्यये भाषायामिति नित्यमनुनासिकः स्यात् जा
तिपदेत्वनास्योपयोगइतिबोध्यम् इड्स्यादौ दीर्घमात्रहृतिजातिनिर्देशात्त्वहति इत्यन्यत्रविस्तरः १८ न
नु सर्वनामानीत्यादौ गणत्वाभावनिपातनेपिलोके सगणत्वप्रयोगस्य साधुत्वं स्यादत आह ॥ बाधकान्येवनि।
पातनानि ततत्कार्यत्वाप्राप्तेनिपातनारम्भात् पुराणप्रोक्तेष्विति निपातितं पुराणशब्दं नपुरातनशब्दस्य
बाधः प्राप्तोपि इष्टेषादशादित्वात्रेति बोध्यम् पुराणेति इष्टेषादशादिः पुरातनेतिचेम्न्यत्पृषेसर्वादिसूत्रे भाष्ये
स्पष्टा अतएवबाधकान्येवनिपातनानीति नभाष्यविरुद्धम् १९ ननु उवधातोर्द्वित्वे स्तनयवकृत्सात्पूर्वमभ्यास
हृस्वाप्रवृत्तौ हलादिःशेषे सवर्णदीर्घे हृस्वापत्तिरत आह ॥ पर्जन्यवल्लक्षणप्रवृत्तिः ॥ एवंच हृस्वस्यापिह
स्वकृते लक्ष्ये लक्षणस्येति न्यायेन न पुनर्हृस्वः नडकमिकोकलितिभाष्ये कृतकारित्वल्वपि शास्त्रं पर्जन्यव
दिति सिद्धेपिहृस्वादिकारीमर्थः नचलक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायेन मानमिति वाच्यम् समावा
लोपमेकेइति लोपेनैकस्य सकारस्य स्यादित्वेन द्वित्वे सकारस्य पुनर्द्वित्वेन त्रिसकारस्य च सिद्धो समः सुटीति सूत्रस्थे
वमाननत्वात् संप्रसारणाच्चक्षिचिवहद्धिर्वियादौ भाष्ये स्पष्टमुक्तत्वाच्च अत्रविकाराणामुक्ततात्पर्यभेदानेति
सिचिवृद्धिरितिभाष्यात्प्रतीयत इत्यन्यत्र विस्तरः २० ननु स्यन्दधातोः स्यन्त्स्यतीत्यादावात्मनेपदनित्त्वाभाव

प. ५३
53

निमित्तत्वान्नहृद्भगसिन्ध्वन्तेभ्यः इति निषेधस्य वहिरङ्ग-त्वेनासिद्धत्वाद्दिल्लत्वाणत्वस्येव विकल्पस्यापत्तिरतआह ॥ निषे-
धाश्चवलीयांसः ॥ अन्तरङ्गानुपजीव्यादपि वलीयांस इत्यर्थः चत्तभ्यः इति तु स्पष्टार्थमेव अतएव तत्प्रत्याख्यानं
भाष्योक्तं सङ्गच्छते अतएव सवर्णसंज्ञादेर्निषेधविषयेन विकल्पः अन्यथा मीमांसकरीत्या विधेरुपजीव्य-
त्वेन प्राबल्यात्तस्य सर्वथा बाधानुपपत्त्या सङ्कीर्वा इति मञ्जूषायां विस्तरः अतएव द्वन्द्वे च विभाषा जसीति च
चितार्थम् विभन्नलनाय प्रवृत्तिरस्या वाजेन लमताकमेणिडि·त्यनयोर्भाष्ये स्पष्टैषा ॥ १११ ॥ नन्वत्यन्तस्वा-
र्थिकानामर्थे प्रत्यायकत्वरूपप्रत्ययत्वानुपपत्तिरतआह ॥ अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥ यस्यार्थः प्र-
कृत्या प्रत्याय्यते सोपि प्रत्ययस्तस्याप्यङ्गीकारान्नस्य प्रत्ययत्वमिति न दोषः स्वार्थे इत्यस्य स्वीयप्रकृत्यर्थे इ-
त्यर्थः महासञ्ज्ञावलादर्थाकांक्षायामेवानुपस्थितिरस्या वाजेस्वपिस्य इत्यादिसूत्रेषु भाष्ये स्पष्टैषा ॥ ११२
योगविभागादिष्टसिद्धिः ॥ इष्टसिद्धिरेव न त्वनिष्टापादनं कार्यमित्यर्थः तत्तत्समानविधिकद्वितीययोगे
न विभक्तस्यानित्यत्वज्ञापनमेतद्बीजम् ॥ ११३ पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते ॥ तत्रतत्रान्यतरस्यां
विभाषा वेति सूत्रनिर्देशाज्ज्ञापितमिदम् ॥ ११४ ज्ञापकसिद्धं न सर्वत्र ॥ स्पष्टमेव प्रतिपत्तेरनुमानाद्यापनमस्या
वैत्रिकत्वार्थमित्यर्थः तेन परिभाषामादायानिष्टतापादनीयमिति तात्पर्यं भाष्येपि ध्वनितमेतत्तत्र तत्र सूत्रा- ५३

दौ ज्ञापकेति न्यायस्याप्युपलक्षणम् न्यायज्ञापकसिद्धानामपि केषांचित्कथनमन्येषामनित्यत्वबो
धनायेति भावः यथा तस्यानायन्नेन तद्धर्मलाभ इति न्यायसिद्धस्यानित्यत्वं ज्ञापकसिद्धं च तत्रानल्विधा
विति ५५ ननु द्वेरयाङ्गोस्याङ्गेह्रस्वो ढ्रेत्यादौ यत्वादीनामसिद्धत्वात्पूर्वं द्वित्वे एकत्र यत्वमपरत्र ढत्वमित्य
स्याप्याप्तिरत आह पूर्वत्रासिद्धीयमद्वित्वे ॥ द्वित्वभिन्ने पूर्वत्रकर्तव्ये परमसिद्धमित्यर्थः पूर्वत्रासिद्धमि
त्यधिकारभवशास्त्रत्वमस्या लिङ्गं यत्र च सिद्धासिद्धत्वयोः फले विशेषस्तत्रैवेयं ह्रस्वहिद्वित्वादौ जश्त्वात्
वमनन्तरं वा द्वित्वे रूपे विशेषाभावेन नास्याः प्रवृत्तिः इत्यन्यत्र विस्तरः सर्वस्य द्वे इति सूत्रे भाष्ये स्पष्टैषा ५६
ननु गोपुत्रस्य पुत्रस्वामीत्यादिवद्गोस्वस्वामी च स्वामीत्यपि स्यात् स्वामीश्वरेति सूत्रेण षष्ठीसप्तम्योर्विधाना
दत आह ॥ एकस्याः आकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भविष्यति ॥ यत्राभ्यावृत्तिकरणे
भिन्नार्थत्वसम्भावना तद्विषयोऽयं न्यायः इत्यन्यत्र विस्तरः कृञ्चानुप्रयुज्यत इति सूत्रे भाष्ये स्पष्टेयम् ५७ ननु
विवायेत्यादौ परत्वाद्धलादिःशेषे वस्य संप्रसारणं स्यादत आह ॥ सम्प्रसारणं तदाश्रयं च कार्यं बलवत् ॥
तदाश्रयं सम्प्रसारणाश्रयं चेति सर्वं रूपम् वस्तेर्लिट्यभ्यासस्येति सूत्रे उभयेषां ग्रहणस्योभयेषां संप्रसारणा
मेव यथा स्यादित्यर्थं तेन सिद्धमित्येषा व्यर्थेति लिट्यभ्यासस्येति सूत्रे भाष्ये स्पष्टम् फलान्तरं तु यथा सिद्धि

इपितत्रैवभाष्येस्पष्टा। णोश्चसंज्ञाऽनेनेत्यादौसंज्ञाऽनेनविभादिर्विषयसप्तमीतितत्रापिनदोषइत्यन्यत्रविस्तरः ११८
यत्तुक्वचिद्विकृतिःप्रकृतिंगृह्णातीतितेननिसमुपविभ्योह्वइत्यत्रह्वग्रहणेनह्वेञोग्रहणसिद्धिःतथा ॥ औपदे
प॰शे शिकप्रायोगिकयोरौपदेशिकस्यैवग्रहणम् ॥ तेनदादेर्धातोरित्यत्रौपदेशिकधातोरेवग्रहणमिति तत्र
४४ तयोर्निमित्तत्वाज्ञाप्याव्यवहृतत्वाच्च नचविकृतिःप्रकृतिंगृह्णातीतिग्रहिज्येतिसूत्रस्थभाष्येणाप्यस्ति
44 रस्कारात्च निसमुपविभ्योह्वइत्यादौह्वेञोनुकरणेसौत्रःप्रयोगः आत्वविषयेएवात्मनेपदंप्रयोगस्याना
मेवानुकरणस्ययुक्तमन्यत्रसन्नेभाष्येस्पष्टमुक्तत्वादित्यन्ये अन्यापितत्रतत्रोपदेशग्रहणंकुर्वतःसूत्रकृतो
वार्तिककृतश्चासंमता इहहिव्याकरणेसर्वेष्वेवसानुबन्धकग्रहणेषुरूपमाश्रीयतेयत्रास्यतद्रूपमिति
रूपतिग्रहस्यशाहस्यनान्तरेणलौकिकप्रयोगंतस्मिंश्चलौकिकेप्रयोगेसानुबन्धकानांप्रयोगोनास्तीति
कृत्वाद्वितीयः प्रयोगउपास्यतेकः उपदेशोनामेतियुक्तमन्त्रादिसूत्रस्थभाष्येणाप्रायोगिकासम्भवेनतद्ग्रह
णमित्यर्थस्यलाभेनभाष्यासम्मताचभाष्येसानुबन्धकेत्यादिप्रकृताभिप्रायेण दादेरितिसूत्रेदादिपदस्यौ
पदेशिकदादित्ववत्तिलक्षणेतिनदोषइत्यन्यत्रविस्तरः ११९ यदपिननुअजर्घावेभिदीतीत्यादौतनन्तुणा ४४
प्रयुक्ताविकरणायङ्‌लुकिसुः तथायङ्‌लुकिवेभिदितेत्यादावेकाचइतीणनिषेधःस्यादतआह ॥ लि

पाशपानुबन्धेननिर्दिष्टंयद्गणेनच यत्रैकाज्ग्रहणंचैवपञ्चैतानिनयङ्लुकि ॥ अनुबन्धनिर्देशोहि
यास्वरूपेणाङि·तइत्यादिपदेनच हन्तिर्यातिवाति सनीवन्तेतिसूत्रेभरेति दीङोयुडचिअनुदात्तङि·तः।
दिवादिभ्यः·पश्यनएकाचउपदेशेऽस्मदादिगणानि इदित्वंसनाद्यन्ताइतिभूवादयइतिधातुत्वंचभवत्येवयु
णोयङ्लुकोरित्यादिभिर्निषेधानित्यत्वकल्पनात् तेनभष्भावोऽभ्यस्तघोरित्यादौभवति अतएवश्चीदितर
तिसूत्रेकैयटेयत्रैकाज्ग्रहणंकिञ्चिदितिपाठः एकाचउपदेशेनुदात्तादितिसूत्रेएकाज्ग्रहणेनैकदेशा
नुमत्यापद्याज्ञाप्यते अन्यथोपदेशेनेकाचामुदात्तत्वस्यैवसत्त्वेननतद्वैयर्थ्यंस्पष्टमेवेतितदपिनभाष्यानुक्त
त्वादेकाज्ग्रहणस्यवधिज्ञाहत्यर्थमावश्यकत्वाच्च नचवधिःस्यान्नुपदेशेएकाजेवेतिवाच्यम् साक्षादु
पदेशसम्भवेनैतद्विषयेस्यान्नुपदेशाग्रहणात् उपदेशतावच्छेदेनैकाचइत्यर्थाच्च किंचोत्तरार्धमेकाज्ग्र
हणमतएवजागरितवानित्यादावुपदेशेऽजन्तत्वमादायश्र्युकःकितीतिनिषेधोन तत्रोपदेशेऽन्यत्वनहति
श्रन्तीणामित्यादावितिनिषेधायेत्याकरेस्पष्टम् नचभाष्येयङ्लोपेवेभिदितेत्यादाविड्ग्रहणस्यस्वुपदेशे
त्वदात्तादेकाचःश्रूयमाणादङ्गादित्यर्थेसनीडप्रतिषेधोवक्तव्योविभित्सतीतिदोषोपन्यासवत्यङ्लुकि
दोषानुपन्यासेनततद्वेडिष्टः यङ्लोपेइत्यादिभाष्यंतदुपक्रमोपसंहारबलेननयङ्लुग्विषयंकिंचतस्य

तद्विषयत्वेयङ्॰लोपेस्थानिवत्त्वस्यैवयङ्॰लुक्त्वपाणिप्रदर्शनेनस्थानतापत्तिरितिवाच्यम् इड्विषयेयङ्॰लुकोले
के॰नभियानेनछन्दसिसर्वविधीनांवैकल्पिकत्वेनचतत्रदोषानुपन्यासेनादोषात् अन्यथैकाज्ग्रहणंकिम
र्थमितिप्रश्नस्यानन्तरत्वजातार्थ्यर्थमिदंवक्ष्यर्थमित्युत्तरस्यचभाष्येनिरालम्बनतापत्तेः नचाईयात्क्वातिप्रपा
प॰शे॰ तोरेकाच इति विशेषणाम् एवंचविभित्सतीत्यादावुत्तरत्वादरस्यधातोरेकाच्त्वमस्त्येवोत्तरत्वादेकस्तितवत् ।
८५ तच्चदयतेरितिसूत्रेभाष्येस्पष्टम् एवंचप्रकृतभाष्यासङ्गतिरितिवाच्यम् प्रात्वेपेआत्विमान्वयेवमानाभा
85 वात् अङ्कं तत्तविशिष्टएवेतिएकाचोद्देशतिसूत्रेभाष्येस्पष्टम् निरूपितञ्चैतन्नादिशेषेणाहेतुशेखरेधात्वंत
त्वरत्वाद्एव अतएवैकाचोवशोभषितिसूत्रेधातोरवयवस्यैकाच इति वैयधिकरण्येनान्वयेगर्धसिद्धिः प्रयो ।
जनसूक्तंभाष्येनतत्प्रसिद्धमजधाइति अजधावेभिसीतीत्यादेश्मव्यपनादयस्त्वचर्करीतंचेत्यस्यादादेपाठेन
यङ्॰लुङन्तेगणान्तवप्रयुक्तविकरणास्याभ्यानभवन्तिछान्दसत्वादेवकार्यान्तराणामपिछन्दसिदृष्टप्रयोगे
ष्टदृष्टानामभावेबोध्यः भाषायान्तुतादृशानामभावएवधिनशबादिनिर्देशास्वभवतेरित्यादिस्थतन्निर्देशाव
न्नार्थस्यापकान्यन्यत्रविस्तरः १२॰ ननुजंभाविरयेस्त्रनेसलिटीत्येवसूत्र्यतांकिंद्विरधिग्रहणेनेत्यतआह ॥ पद ८५
गौरवाघागविभागोगरीयान् ॥ प्रतिवाक्यंभिन्नवाक्यार्थबोधकत्वेनगौरवंस्पष्टमेवपरंतुभाष्यासम्मतेयं

ठा३· सीतिसूत्रस्थभाष्यविरुद्धाच तत्रचैनादेशेऽकारप्रश्लेषव्याख्यानंयोगविभागेनैवकृतमितिवदन्तः ५१
अर्द्धमात्रालाघवेनपुत्रोत्सवंमन्यन्तेवैयाकरणाः ॥ एओङ्·ऐऔच्सूत्रयोर्भाष्येध्वनितेषा तत्रानेकपदघटि
तसूत्रेषुप्रायेणपदलाघवविचारएवनतुमात्रालाघवविचारइतिऊकालोज् अष्टकपकालित्यादिसूत्रेषुभाष्येध
नितम् तत्रहिसूत्रेषुअलहलग्रहणयोर्विशेषविचारेसञ्ज्ञायांहलग्रहलग्रहणंएयत्वाद्रियेतिसूत्रेऽणोजोरिति
वाच्यमितितत्रीणिपदानि अलग्रहणेतदेकंहलादिलोपेहलग्रहणंएपत्वाद्रियेतिसूत्रेणोजोरितिनवाच्यमिति
मष्टकस्येतिवाच्यमितित्रीणिपदानीतिनास्तिलाघवकृतोविशेषस्तत्कम् अचिश्नितिसूत्रेएरनेकाचिष्ठेयो
रितिसंख्याग्रहणात् परेणाग्रहणंतत्रविभक्तिनिर्देशेसंख्याग्रहणसामर्थ्यात्सिद्धेमात्राइणितितसो
मात्राइतिलणसूत्रभाष्योक्तेस्तथाचोतः स्यपनीतिसूत्रेयितीतिवक्तव्यम् तत्रापमप्यर्थेः स्थिवुक्कमितिसूत्रे
श्रितीतिनकर्त्तव्यंभवतीतिभाष्येनकेवलंमात्रालाघवंयावद्यमपर्थ्येइतिकैयटोक्तेःप्रायेणेतिशिवम् ॥ ॥
इतिश्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टविरचितःपरिभाषेन्दुशेखरःसमाप्तः ॥
सं· १८२९ ॥

56

